मड़ल्या

उमाकान्तशुक्

मङ्गल्या

આયુષ્મતે
ડૉક્ટર-રમાકાન્તશુક્લાય
અનુજાય
પ્રાભૃતીકૃતા મઙ્ગલ્યા રાજના

ઉપાધ્યાયૈઃ
૧.૧૨.૬૯

आर्या भावभरेयं सर्वेषान्नो भवाय भव्याय ।
ब्रह्मानन्दविधाने भूयाद् भूयो भवे भव्या ॥

—श्रीब्रह्मानन्दशुक्लस्य

[रचनाकालः, १९४३ नवम्बरमासः ।]

वितरकः
सुधाकमल-ग्रन्थालयः, २६३, उत्तरी गान्धी कालोनी,
मुजफ्फरनगरम् २५१००१

मङ्गल्या

संस्कृतमुक्तकरचना
प्रियम्वदाख्यपादटिप्पणीसमन्विता

रचयिता

टिप्पणीकारश्च

उमाकान्तशुक्लः
मुजफ्फरनगरस्थसनातनधर्ममहाविद्यालये
संस्कृताध्यापकः

प्रकाशकम्

शारदासदनम्, मुजफ्फरनगरम् (उ०प्र०)

१९७५

MANGALYĀ (Sanskrit Poetry)
by 'SUKLA UMĀKĀNTA
FIRST EDITION, 1975 (NOVEMBER)
Price Rs. 10/= (Library edition)
5/= (Ordinary edition)
© UMĀKĀNTA 'SUKLA
Published by
'SĀRADĀ-SADANA, 264, Gandhi colony (North)
MUZAFFARNAGAR (U. P.)

Distributors
Sudha-kamala-granthalaya
263, North Gandhi Colony,
MUZAFFARNAGAR-251001

Printed by
Sarvodaya Press, Meerut (U. P.)

प्रस्तावना

स्वमातृनामानुसारिणीभिः प्रियम्वदाख्याभिः संक्षिप्ताभिष्टिप्पणीभिः समन्विताया अस्या मङ्गल्यायाः प्रकाशनप्रस्तावे समेऽपि ते सहृदयसुहृदः स्मर्यन्ते येषां हि प्रेरणाऽस्याः प्रस्तुतस्वरूपाकल्पनायां प्रधानं निदानम् ।

साहित्याचार्यैः श्रीलक्ष्मीचन्द्रकौशिकैर्बरेलीस्थबरेलीकालेजे संस्कृतविभागाध्यक्षैर्भूमिकामभिनवां विधायास्मन्महाविद्यालये चित्रकलाविभागाध्यक्षैः श्रीशुकदेवश्रोत्रियैः पुस्तकान्ते प्रदत्तमस्मदीयं रेखाचित्रं विलिख्यान्तेवासिन्या कुमार्या सन्तोषसिंहलाख्यया भागिनेयेन कमलेशकुमारकपिलेन श्यालकेन विकासकौशिकेन च पाण्डुलिप्यादिकर्मणि साहाय्यं सम्पाद्य, मुजफ्फरनगरस्थशारदासदनेन चास्याः प्रकाशनमापाद्य सर्वथा समुपकृतोऽस्मीति यथायथं तेषु तेषु धन्यवादानाशीराशींश्च वितीर्य कृतज्ञतां विज्ञापयामि ।

खजुराहोस्थानीयकलामन्दिरजीवितानामज्ञातनामधेयानां प्रस्तरशिल्पकृतक्षणानान्तेषां सर्वेषामेव मूर्तिकाराणां श्रद्धाकलितेन मनसा स्मरणं क्रियते येषामसंख्यासु मूर्तिषु काश्चनात्र मुखपृष्ठे संयोज्यास्या मङ्गल्याया गौरवं संवर्ध्यते ।

प्रस्तुतायामस्यां रचनायां प्रत्येकमार्यायाः प्रायशः प्रतीकात्मकं शीर्षकं विन्यस्य तदनु चान्यदीयकाव्यांशरूपोपशीर्षकमुपन्यस्याधोऽधश्चतास्तन्निर्माणतिथिः ख्रैष्टाब्दानुसारिणी दत्ता ।

कीदृशीयमित्यत्र तु सहृदयाः प्रमाणमिति ।

विद्वच्चरणरेणुचन्दनचर्चितोत्तमाङ्गः

नवम्बरमासः । १९७५ शुक्लोपाह्व उमाकान्तः ।

सटिप्पणमङ्गल्यायाः शुद्धिपत्रम्

पृष्ठाङ्काः	पङ्क्तिः	अशुद्धम्	शुद्धम्
७	११	०तरूणी०	०तरुणी०
९	१८	भावा	भावाः
१३	२	प्रदीपाः	प्रदीपा
२०	१४	पवनः	पवनो
२५	५	त्वं ॥	त्वम् ॥
२६	१७	तुभ्यम् च	तुभ्यं च/तुभ्यञ्च
२७	११	परितस्वामद्य	परितस्त्वामद्य
२७	२१	ब्रवे	ब्रुवे
२९	१०	प्राप्तेन्वद्य	प्राप्ते न्वद्य
३०	८	०भूत् सुभाषितरत्न	०भूत् । सुभाषितरत्न०
३१	४	मन्मानससाकं	मन्मनसा साकं
३२	२	०मुपागतः	०मुपागतः ।

अनुस्वारादिकं यत्क्वचिद्यन्त्रदोषात्त्रुटितं तदपि शोधयन्तु सहृदयाः पाठकाः ॥

—: ० :—

भूमिका

लेखकः

श्रीलक्ष्मीचन्द्रकौशिकः, साहित्याचार्यः, एम्० ए०
बरेलीस्थ बरेलीकालेजे संस्कृतविभागाध्यक्षः

अथ गीर्वाणवाण्या मुक्तककाव्यमयेऽपूर्वे विलक्षणे चास्मिन् वाङ्मये कविवरैः साहित्याचार्यादि-विविध-विरुदावलि-विभूषितैः श्रीमद् उमाकान्तशुक्लमहोदयैः संगुम्फिता, शतादपि पञ्चत्रिंशदधिकैर्मधुरैरार्याच्छन्दोभिर्निबद्धैर्ललितैः सरसैरपरिसीम-व्यङ्ग्यार्थाभिव्यञ्जनात् नितरां मनोहरैर्मौक्तिकैरिवप्रोज्ज्वलैश्च, प्रायशो निरवद्यैः पद्यैः संवलिता, स्वकीयां कामप्यभिनवां विशिष्टाञ्चाभिख्यां, लोकात् समुद्भूतमप्यात्मनः किमपि लोकोत्तरं विलक्षणञ्च लावण्यं विकिरन्ती, जीवनं जगच्च परितः प्रतिक्षणं विचक्षणं माङ्गल्यमादधाना, कवेरस्य प्रतिपदमनन्यसाधारणं कमपि प्रतिभाविशेषं परिस्फोरयन्ती, 'प्रियंवदा'ख्यटिप्पणी-समन्विता, 'मङ्गल्या'ऽभिधाना, मौक्तिकानां मालेव प्रकाशमाना, मुक्तकानामावलिरियं, साहित्यपाथोनिधिमन्थनोत्थं भावामृतं, परां निर्वृतिञ्चाधिजग्मुषां विदुषां, सहृदयानाञ्चाधिकण्ठमधिहृदयञ्च सम्प्रति सुतरां बाभासत इति कस्य सचेतसो न मोमुद्यतेतरां चेतः ?

मुक्तककाव्यस्य परम्परेयं संवत्सराणां सहस्रद्वयीमासीदतीति तु साहित्यस्यैतिह्य-तत्त्वविदां विमर्शः । वाङ्मयेऽस्मिन् 'गाथासप्तशती' 'अमरूकशतकं' 'आर्यासप्तशती' 'भामिनीविलासः' इत्यादीनि विविधानि ग्रन्थरत्नानि विलसन्ति । ध्वन्यालोकस्य तृतीय उद्द्योते विषयाश्रयौचित्यस्य प्रतिपादन-प्रसङ्गे ध्वनिप्रस्थापकाः श्रीमदानन्दवर्धनाचार्याः काव्यप्रभेदेषु सर्वतः प्राक् संस्कृतप्राकृतापभ्रंश-निबद्धं मुक्तकं निर्दिशन्तस्तत्रापि च संघटनाया रसानुकूलतां प्रदर्शयन्तः, कथयन्ति—"मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते । यथा ह्यमरूकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव" (काव्यमाला संस्क०, पृ० १७५)। "मुक्तमन्येन नालिङ्गितम् । तस्य संज्ञायां

कन् । तेन स्वतन्त्रतया परिसमाप्तनिराकाङ्क्षार्थमपि प्रबन्ध-मध्यवर्ति मुक्तकमित्युच्यते ।" इति, "पूर्वापर-निरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेवमुक्तकमिति" चात्र लोचनकाराणां निष्कर्षः ।

मार्मिकाणामालोचकानां मुक्तक-स्वरूपस्यानेन तात्त्विकेन पर्यालोचनेन महाकाव्यादिषु विद्यमानस्य कथानकादेः पौर्वापर्य-निरपेक्षित्वं खल्वेवंविधस्य काव्यस्य प्रधानं वैशिष्टचमिति सिध्यति । अत्र प्रत्येकं पद्यं स्वभावतः स्वस्मिन्नेव परिपूर्णतामावहतीत्यन्वर्थेयं किल पूर्वापर-प्रसङ्ग-निरपेक्षित्वान् मुक्तकमिति संज्ञा ।

मुक्तकानामपूर्वस्य चमत्कारस्य रहस्यं विश्लेषयन् 'गाथासप्तशती'—भूमिकायां भट्टः श्रीमथुरानाथशास्त्री साहित्याचार्यः प्राह—"मुक्तके ह्येकस्मिन्नेवापरपद्यनैरपेक्ष्येण विभावानुभावादिभिः परिपुष्टस्तावान् रसोऽभिव्यज्यते यदास्वादेन संतर्पितचेतसः सहृदयाः सशिरःकम्पमनुमोदन्ते । मुक्तकनिर्माणमन्यकाव्यनिबन्धनापेक्षयापि सुतरां कठिनं भवतीति तद्विदामनुभवः । यतः किल महाकाव्यखण्डकाव्य-आख्यायिकादिषु कथानकस्य नैपुण्येन निर्वाहे पठितुर्मानसं कथारस-निलीनतया गुणदोषादिविचारे मन्थरमेव भवति । तत्र हि कथैव चेतसस्तावत् किल वशीकारिणी भवति, यावता उत्तरोत्तरघटनास्वादायोत्कण्ठितं चेतः संमुखमापतितेषु गुणदोषादिषु गजनिमीलिकया, त्वरितकारितया वा, अनिच्छया यथाकथञ्चित् प्रवृत्त्यापि शीघ्रमेव कथापरिज्ञानार्थमग्रेसरं भवति । एवंविधेषु काव्येषु मध्यवर्तिनः कियन्तोऽपि श्लोकाश्चेत् सर्वात्मनोपश्लोकनीयाः संपद्यन्ते, तावतैव स प्रबन्धो लोकानामभिनन्दनीयो भवति । मुक्तकानि तु प्रत्येकपद्यान्येव स्वतन्त्राणि भवन्तीति, तत्रैव रसान्वेषणलोलुपं पठितुर्मानसं व्यासज्यते; न कथा तत्रोपष्टम्भिनी भवति । ···पूर्वापरनिरपेक्षे एकस्मिन्नेव पद्ये पठितुश्चेतश्चमत्काराय वाच्यार्थापेक्षया व्यङ्ग्यस्यैव प्राधान्यमास्थापनीयं भवति । अतएव एवंविध-ध्वनि-पूर्णस्य काव्यस्य निर्माता 'महाकविः' इति व्यपदेशं लभते । उक्तं हि लोचन-कारेण— "प्रतीयमानानुप्राणित-काव्य-निर्माण-निपुण-प्रतिभा-भाजनत्वेनैव महाकविव्यपदेशो भवती'ति ।" (काव्यमाला संस्क०, तृतीयावृत्तिः, पृ० १५-१६) ।

सर्वप्रथममृग्वेदस्य संहितायाः प्रत्येकम्मण्डलस्य बहूनां सूक्तानामनेकासु ऋक्षु 'कवि'—पदं, 'काव्य'—पदञ्च, पृथक्तया वा, परस्परं संपृक्ततया वा, प्रायः

सर्वासामेव देवतानामृषीणां वा, संबोधनत्वेन, विशेषणतया वा द्वैविध्यमादधानं बहुशः प्रयुज्यते। तत्र कविपदेन सह प्रयुक्तानि विविधानि विशेषणानि, कविं तस्य काव्यञ्चाधिकृत्य, वैदिकीं धारणां सुस्पष्टमभिदधति, तथाहि— 'आ॒दि॒त्यास॑: क॒वय॑: पप्रथा॒ना.' (३/५४–१०), 'अवो॑चाम क॒वये॒ मे॒ध्या॑य' (५/१–१२), '···ऋत॑ज्ञाः। स॒त्य॑श्रुत॒ कव॑यो॒ युवा॑न. (५/५७–८), 'क॒वे र्दि॒व्यस्य॑' (६/३९–१), 'ऋ॒तावा॑न क॒वय॑: प॒र्व्यास॑.' (७/७६–४), 'क॒वयो॑ मनी॒षिण॑:' (९/७३–७), 'क॒विः काव्ये॑नासि विश्व॒वित्' (१०/९१–३), 'ज॒रि॒ता मेधि॑रः क॒विः' (१०/१००–६), 'क॒विर॑सि॒ प्रचे॑ताः' (१०/११०–१), एभिर्विशेषणैरुपरिनिर्दिष्टा ऋचः कवेरदितेरपत्यत्वं, मेध्यतां, ऋतज्ञत्वं सत्यश्रुतत्वं दिव्यत्वं, मनीषितां, विश्ववित्तां, मेधिरत्वं प्रचेतस्त्वञ्च स्फुटतया निर्दिशन्ति। अतएव महर्षिणा यास्केन, ''विश्वा॑ रू॒पा॒णि॒ प्रति॑ मुञ्चते क॒विः (५/८१–२) इत्यादि ऋचोभाष्ये कवेः क्रान्तदर्शनत्वं समाम्नातम्[1]। यस्य

---

[1] स्वकीये 'Vedic selections' इति पुस्तके श्रीक्षितीशचन्द्रचटरजी महोदयः 'अ॒ग्निर्होता॑ क॒विक्र॑तुः' (१/१–५)इत्यादिमन्त्रे निम्नलिखितस्य सायणभाष्यस्य "कविक्रतुः कविशब्दोऽत्र क्रान्तवचनः, न तु मेधावि–नाम। क्रतुः प्रज्ञानस्य कर्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा"—उपरि स्वकीये टिप्पणे (३३ पृ०) प्राह—"कविः, मनीषी, विपश्चित्, etc., are read in the Nighantu in the list of मेधाविनाम's (Nir. iii. 15) or words denoting wise men. In Nir. xii. 13. while explaining विश्वा रूपाणि प्रतिमुञ्चते कवि. RV. v. 81·2 Yaska says: मेधावी कविः क्रान्तदर्शनो भवति, कवतेर्वा, i.e., कवि means wise, because he sees what is past and distant, what is beyond the range of vision, or it may have been derived from the root 'कु' to praise. It would appear, therefore, that acc. to Yaska मेधाविन् is explained by the words क्रान्तदर्शनो भवति and there is no contradiction between the two. Sayana, however, sometimes regards मेधाविन् and क्रान्त as two distinct senses of कवि. cf. S. under V. 11·3 and i. 117.23.

"अतीतानागतविप्रकृष्टविषयकं युगपज्ज्ञानं स क्रान्त[1]दर्शन" इत्युवटः। तादृशं ज्ञानं परमार्थतत्त्व-दर्शनात् केवलं देवानामृषीणामेव वा सम्भवति, तस्माद् ऋषित्वं, तत्त्वदर्शित्वं, कवित्वञ्च परस्परं संबद्धमिति वेदार्थतत्त्वविदामभिप्रायः। तथैव चोक्तमालोचकप्रवरेण भट्ट-तौतेन—

"नानृषिः कविरित्युक्तम्, ऋषिश्च किल दर्शनात्।
विचित्रभाव-धर्मांश-तत्त्वप्रख्या च दर्शनम्॥
स तत्त्वदर्शनादेव, शास्त्रेषु प्रथितः कविः।
दर्शनाद् वर्णनाच्चाथ, रूढा लोके कविश्रुतिः॥" इति।

विश्वस्मिन् जगति निरन्तरं प्रवर्तमानायाः सततं परिवर्तन-शीलाया विविधायाश्च जीवनधारायाः, प्रतिक्षणं भिद्यमानस्य, क्षणे क्षणे च नवतामुपेतस्य, प्राकृतिकपरिवेशस्यातीव विनश्वरे, भौतिके चास्मिन् बाह्ये रूपे, यदान्तरं, शाश्वतं, सुन्दरञ्च, स्वरूपमन्तर्निहितं निगूढं च वर्तते, प्राचीनां रूढिमनुसृत्य, तदेव 'धर्म' इति पदेनाभिधीयते स्म। वैदिकपरिभाषया 'ऋ[2]तं', 'सत्य'ञ्चेति

---

१. 'राजतरङ्गिणी' कवेरिदं कान्तदर्शित्वं निम्नलिखिते मनोहरे पद्ये निर्दिशति—

कोऽन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः।
कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः॥

२. 'ऋ' गतावि (भ्वा० प०)—त्यस्मात् "गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च" (पा०, ३–४–७२) इति कर्तरि क्तप्रत्यये, ऋतमितिपदं निष्पद्यते; प्रधानतया गतिशीलताञ्चाभिव्यनक्ति। अतएव, 'ऋतमित्युदकनाम, प्रत्यृतं भवति' (पृ० १०२), 'सत्यं वा यज्ञं वा' (पृ० १६३), 'ज्योतिषो वोदकस्य वा' (पृ० ४६०, निरुक्तम्, नि० सा० संस्क०) इति निरुक्ते यास्कः। तत्रैव, 'ज्योतिषो वेत्यादि वाक्यस्य व्याख्यायां पण्डितः श्रीमुकुन्दशर्मा—'ऋतमुदकं ज्योतिश्च, इयर्तीतिसतः।' "ऋत (rta) means the regular order of nature, such as the unvarying couse of the sun and the moon, and the seasons; then on one hand, the regular course of sacrifice (rite); on the other, moral order (right), a sense replaced in Skt. by dharma. Agni is specially the guardian of rta in

पदद्वयमप्येतयोः क्रमश एकतो नियमेन गतिशीलं बाह्यं रूपं, अपरतश्च तयोरेवान्तरिकं, मनोरमं, शाश्वतञ्च स्वरूपमभिधत्ते ।

'ऋषयोमन्त्रद्रष्टारः' इति प्रसिद्धिः । "साक्षात्कृतधर्माण ऋषयो बभू[1]वुः", "ऋषिर्दर्शना[2]दि"ति च निरुक्ते भगवान् यास्कः । अत्र 'मन्त्र-धर्म-दर्शनादि पदानामुपरिष्टान्निर्दिष्टमेव तात्पर्यं साधीयः । कवयः 'ऋतज्ञाः' (५/५९–८), 'ऋतावानः' (७/७६–४), 'सत्यश्रुत'श्च (५/५७–८) इति तु भगवती श्रुतिरेव प्रतिपादयति । तस्माज्जीवनस्य जगतश्च यत् पारमार्थिकं तत्त्वदर्शनं नाम, ऋषिषु कविषु च, तत्तु सामान्यमेव । तादृशं परमं तत्त्वं प्रत्यक्षीकृत्य, तस्य मनोरमायां लोकोत्तरायाञ्च वर्णनायां यत् सम्यङ् मार्मिकञ्चाभिव्यञ्जनं तत् कवीनामेवासामान्यं प्रातिस्विकञ्च वैशिष्टचम् । अतएव भट्टतौतः प्राह—

"तथाहि दर्शने स्वच्छे, नित्येऽप्यादिकवेर्मुनेः ।
नोदिता कविता लोके यावज्जाता न वर्णना ।।" इति ।

एवमेव मम्मटाचार्यैरपि काव्यप्रकाशस्य प्रथम उल्लासेऽभ्यधायि—"विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुण-कविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद् वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।" इति (का० प्र०, वामनाचार्यझलकीकरस्य, षष्ठं संस्क०, पृ० १०) ।

भट्टनायकस्तु पर्यालोचयति यन्निरन्तरं कठोरानवरतस्वसाधनाबलाल्लब्धो योगिनः स समाधिरसस्तस्य काव्यरसस्य तुलां कथमपि नाध्यारोढुमर्हति, यं दिव्यमानन्दरसं स्वकीयस्य प्रियवत्सस्य कवेस्तृष्णया स्वयमेव प्रस्नुवाना वाग्धेनुरनायासमेव वात्सल्यवशात् तस्मै प्रददाति—

---

the ritual sense, because the sacrificial fire is regularly kindled everyday; Varuṇa is specially the guardian of rta in the moral sense." MACDONELL, Vedic Reader, p. 9.

[1] द्र०, पण्डितश्रीमुकुन्दशर्मणा सम्पादितं निरुक्तम् नि० सा० संस्क०, १९३०, पृ० ५२ ।

[2] तदेव, पृ० ८३ ।

"वाग्धेनुर्दुग्ध एतं हि रसं यद् बालतृष्णया ।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥" इति ।

"सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्" (ध्वन्या० १/६), इत्यत्र, "···वस्तु सुकवेः । सरस्वत्यैवैषा घटयति यथेष्टं भगवती" (ध्वन्या०, ४/१७) इत्यत्र च कवेर्निर्मलायां झटिति तत्त्वार्थदर्शनशीलायामपूर्ववस्तु-निर्माण क्षमायां नवनवोन्मेषशालिन्यां विशदायाञ्च प्रतिभायां जीवनस्य जगतश्च पूर्वोक्तं वस्तुतत्त्वं विद्युदुन्मिषितमिव, सहसैव परिस्फुरति, विद्योतते च बहुश इति प्रदर्शयतां ध्वनिकाराणामप्येवंविधैव वाचोयुक्तिरिदमेव चाकूतम् ।

तदिदं काव्यं केनापि विशिष्टेनेतिवृत्तेन सह निबद्धमनिबद्धं वेति कृत्वा महाकाव्यत्व-खण्डकाव्यत्वादिना रूपेण, मुक्तकरूपेण च द्वैविध्यमापद्यत इति प्रागेवावेदितम् । तत्र काव्यस्य प्रथमे रूपे कस्यचिद् दिव्यस्य देवस्य, दिव्यादिव्यप्रकृतेर्महर्षेर्वा, केषाञ्चित् प्राचीनपरम्पराप्राप्तानां, तथाकथितानामत्युच्चकुलीन-कुलोद्भवानां धीरोदात्तादीनां नायकानां नायिकानां वा प्रख्यातं वृत्तं महता समारोहेण व्यावर्ण्यत इति तु विदन्त्येव विद्वांसः ।

एवंविधानां जनानामादर्शोन्मुखस्य, दिव्यस्य, भव्यस्योदात्तस्य च कथावस्तुनः कठोरात्, कवेः प्रतिभाया निगडभूताच्च, बन्धनाद् विनिर्मुक्ता, मुक्तकानां काचित् पुरातनी परम्परेयं ख्रिस्तीयसंवत्सरस्य प्रथमे शतके, 'गाथासप्तशते'राविर्भावकालादारभ्य, साधारणजनतायाः सहजं, लौकिकं, प्राकृतञ्च जीवनं स्वप्रतिपाद्यविषयत्वेन स्वीकृत्य, तज्जीवनस्य वास्तविकं याथार्थ्यमभिव्यनक्ति स्मेति महतः सौभाग्यस्य प्रमोदस्य च विषयः ।

एवंविधेन संविधानकेन, जनताया जीवनस्य लौकिकं प्रेम, नानाविधाः सूक्ष्मा विचित्राश्च भावा, मुक्तकेऽस्मिन् काव्ये प्रतिबिम्बिताः सन्तः, किमपि मधुरं वैदग्ध्य-भङ्गि-भणितिप्रयुक्तं वक्रत्वं, कमपि मनोरमं भङ्गिमानं, कामपि विचक्षणामभिव्यक्तेः प्रौढिं सुषमाञ्चाभजन्तेति निश्चप्रचम् । वस्तुतः, सर्वप्रथममेषु मुक्तकेषु पद्येष्वेव प्रबन्धकाव्यानां तं कृत्रिममौपचारिकं, परिमितं, प्रायेण काल्पनिकञ्च भावसीमानमपहाय, लौकिकं काव्यमिदं तामपरिमितामतिविस्तृताञ्च सर्वसामान्यां, मानवीयां भावभूमिमध्याचक्राम, यत्र वाङ्मयव्योम्नि सत्यमशेषशेमुषीसम्पन्नानां, सिद्धवाग्विभवानां बहूनां कवीनामप्रतिमं प्रातिभं ज्योतिर्विविधाभिर्भङ्गीभिर्विलक्षणाभिश्चच्छटाभिः सुतरां समुद्भासते स्म ।

"देवस्य पश्य काव्यं न ममार न जीर्यति" (अथर्ववेदः, का०—१०, अ०—४, सू० ८—३२) इति श्रुतेरादेशः। अत्र 'देवस्य काव्य'मिति पदद्वयेन काव्ये देवसम्बन्धित्वं दिव्यत्वं वा, 'न ममार', 'न जीर्यति' इति वाक्याभ्यां तस्या दिव्यताया हेतु-द्वयं लक्षणं वा निर्दिश्यते। यद्धि 'न जीर्यति', तत् सदैवाभिनवाभि र्यौवनच्छविभिः सौन्दर्यच्छटाभिश्च समृद्धं भवति; यच्च 'न म्रियते' तच्छाश्वतममृतत्त्वमधिगच्छति; तदेव च तत्त्व—द्वयं कस्मिन्नपि काव्ये दिव्यत्वममृतत्त्वञ्चादधातीत्यस्याः श्रुतेरभिप्रायः प्रतीयते। अथैवंविधं काव्यं कुत्र दृष्टम्? इति जिज्ञासायां, स्वयं श्रुतिरेव खल्वेवंलक्षणस्य काव्यस्य निदर्शनमिति केषाञ्चिद् विपश्चितामभिमतम्।[1] किन्तु ऋक्संहिता तु प्रसङ्गेऽस्मिन् किञ्चिदन्यदेव रहस्यं समुद्घाटयति। तत्र दशमे मण्डले बृहदुक्थो वामदेव्य ऋषिः कथयति—"देव॒स्य॑ पश्य॒ काव्यं॑ महि॒त्वाद्या म॒मार॒, स ह्यः समान॑" (५५—५) इति। अर्थात्, यो ह्यस्तावदतीव सजीवः सप्राणश्चासीत्, स एवाद्य पञ्चत्वमुपगत, इत्यहो! महान् महिमा देवस्य महेन्द्रस्य!! एतदेव च तस्य देवस्य महत्काव्यमिति! महाकवेः कालिदासस्य—"मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः" इत्यादिपद्येऽस्या ऋचः प्रतिध्वनिरिव श्रूयते। अत्र वामदेव्य ऋषि मरणमपि देवस्य महत्काव्यमिति मन्यते! तस्मादुपरिनिर्दिष्टयो र्मन्त्रयोः सामञ्जस्येनैतत् सिध्यति यज्जगतो मानवीयजीवनस्य च यदप्यखिलं पारमार्थिकं तत्त्वं' यच्च तयोः परमं सौन्दर्यं, तस्य मर्मस्पृशा मनोरमेण च प्रतिपादनेनैव कस्मिँश्चित् काव्ये दिव्यत्वममृतत्वञ्चाधीयते।

---

[1] "परमेश्वरीय-ज्ञानलक्षणं वेदञ्चापि काव्यत्वेनैवानुगृह्णाति श्रुतिः—'पश्य देवस्य काव्यं न ममार न जीर्यति' (वेदः)। 'देवस्य काव्य' मित्यत्र काव्यपदं वेदमभिधत्ते। इत्यनेनैतदभ्युपपन्नं भवति यत् कविभिः काव्यकला-प्रेरणा किल वेदेभ्य एव समासादिता। वेदेभ्य एव च छन्दसां परिज्ञानं, अलङ्काराणां परिचयः समाकलितः।" इति 'संस्कृत-साहित्य-विमर्शे' (पृ०, ३४१) कविराजश्रीमदाचार्य-पण्डित-द्विजेन्द्रनाथशास्त्रिणः।

जीवनं जगच्च निरन्तरं परिवर्तमानाभिर्देश-काल-व्यक्ति-परिस्थित्यादीनामत्यन्तं विशिष्टाभिरपरिमिताभिश्च सीमाभिः सर्वतः परिच्छिन्नं भवति। जीवनस्य महोदधावस्मिन् क्वचिन्मधुर-मसृण-मुग्ध-स्निग्ध-ललित-प्रशान्त-मनोहराणां रागानुराग-विरागादि-भावानां लहर्यः समुल्लसन्ति; अन्यत्र दारुण-दुर्घटनावशाद्, दुर्दान्त-दुर्दैव-दौरात्म्याद् वा, निरवध्यसीमासह्यागाध-कारुण्य-परिपूर्णानां घनीभूतानां मानवीय—संवेदनाना-मुद्दामाः कल्लोला अनिशं भृशञ्च परिखेलन्ति; अपरत्र दैन्य-दारिद्र्यादि-दुर्दशा-ग्रस्तानां विवशनिरीहासहाय-शोषित-दुर्बलानां मनुजनुषामदम्य-दुरन्त—कुण्ठा-संत्रासाक्रोश—यातनादि-महोर्मीणां बीभत्सो भीषणश्च विस्फूर्जथुरजस्रं जरीजृम्भते। एवं मानवजीवनस्य परिवेशोऽयं दिक्कालपरिस्थित्यादीनामानन्त्याद्, वैविध्याच्च कदाचित् कमनीयो मनोरमः, कदाचिद् भयानको बीभत्सश्च प्रतीयते। तथैव, तस्मादेव कारणाच्च प्रकृतेः परिवेशोऽपि वैविध्यमानन्त्यञ्च परिदधाति। तयोरतिविशिष्टेऽस्मिन् संविधानके सहृदय-हृदयैकसंवेद्यं, कवीनां प्रतिभा-विशेष-प्रसादादुपलभ्यमुपर्युक्तयोर्मन्त्रयोरुपरिनिर्दिष्टन्तत् पारमार्थिकं तत्त्वमनुपमं सौन्दर्यञ्चान्तर्निविष्टं, सर्वथा निगूढञ्च वरीवर्तते। कवेः कापि तत्त्वार्थदर्शिनी विचक्षणा शेमुषी स्वकीयया प्रौढयाऽनल्पया च कल्पनया, जीवनस्य जगतश्च तेषां नानाविधानां सन्दर्भाणां विशिष्टं देशं, कालं परिस्थितिञ्च सम्यक्तया संविभाव्य, तत्राधिष्ठितं पूर्वोक्तं तदप्रतिमं सौन्दर्यं, तान् विचित्रान् भावान्, तां सूक्ष्मां गभीराञ्च विचार-परम्परां, निजेन विलक्षणेन प्रातिभेन चक्षुषा[1] प्रत्यक्षीकृत्य, यथासामर्थ्यं, स्वकीयायां विशिष्टायामपूर्वायाञ्च शब्दार्थ-संयोजनायां, 'विन्यास-विशेषभव्यतया'[2] तथा निबध्नाति, यथा तत्र

---

[1] १. आचार्यमहिमभट्टः कवेः प्रतिभां 'भगवतस्तृतीयं चक्षु' रितिकथयति—

"सा हि चक्षुर्भगवतस्तृतीयमिति गीयते।
येन साक्षात्करोत्येष भावाँस्त्रैकाल्यवर्तिनः॥"

[2] २. "यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः।
तैरेव 'विन्यास-विशेष-भव्यैः' सम्मोहयन्ते कवयो जगन्ति॥"
इति 'शिवलीलार्णवे' (१/१३) महाकाव्ये श्रीनीलकण्ठदीक्षितः।

पूर्वोक्तं तन्निगूढं रहस्यजातं, काव्यस्य तदात्मतत्त्वं शतकृत्वः सहस्रकृत्वश्च बहुधा विद्योतते ।

एवंविधा कवेः कापि लोकोत्तरा संविदियं निजां कामपि प्रौढिं, स्वोपज्ञं किमप्यगाधं गाम्भीर्यं, अतीव सम्मोहकं किमपि सान्द्रं माधुर्यं, सर्वातिशायि किमप्यद्भुतं सौन्दर्यञ्च संविभर्ति । अत्र जीवनस्य जगतश्च याथार्थ्येन संरूषितं महाकवेरस्य तद् दिव्यं प्रातिभं ज्योति विश्वात्मन आन्तरेण ज्योतिषा सार्धं तादात्म्यमश्नुते । येन स्वभावत एव तादृशं संविद्विशेषमभिव्यञ्जयत्यमन्दानन्दतरङ्गितान्तरङ्गोल्लास-विलास-समुच्छ्वसिते, तथाविधे तस्य पद्यबन्धेऽनुरणनस्वरूपाणामनन्तानां प्रतीयमानार्थानां सार्थाः, गुणानामलङ्काराणाञ्च समुदाया अहमहमिकया परापतन्ति । कविप्रतिभायाश्चापृथग्यत्न[1]—निर्वर्त्यत्वात् कामप्यद्वितीयामेव सुषमाञ्चाविष्कुर्वन्ति ।

तत्काव्यस्य तां तादृशीमसंख्यैः संख्यानैः समन्वितामभिख्यां दर्शं दर्शं, पायं पायं च तदधिष्ठितां मधुरिम-सुधां, हृदयसंवादवलात् तन्मयीभवनेन, सहृदयाः, स्वसंवित्-सतत्त्वां कवेस्तां संविदं सस्पृहं, सादरञ्च समास्वादयन्ति; विगलित-वेद्यान्तरं परमानन्दञ्चाधिगम्य कृतकृत्या, धन्यधन्याश्च भवन्ति । इदमेव कविसहृदयाख्यं तत् सरस्वत्यास्तत्त्वं यस्य विजयाशंसा 'ध्वन्यालोक-लोचनस्य' मङ्गलाचरणात्मके 'अपूर्वं यद्वस्तु' इत्यादि पद्ये, 'सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयतादिति' वाक्येन श्रीमदभिनवगुप्ताचार्यपादैरपि विहिता ।

समासतो दिक्कालाद्यनवच्छिन्नायाः सर्वविध-सीमारहितायाः सामान्य-मानवीय-भावभूमेरानन्दमयी 'मानसी साक्षात्कारात्मिका' प्रतीतिरेव कस्यापि काव्यस्य विलक्षणायाश्चमत्कृतेः परमं रहस्यम् । मुक्तकेन काव्यनेतिवृत्तादिसीम्नां यदतिक्रमणं नाम तत्तु प्रागेव निर्दिष्टम् । निजायामभिव्यक्तावपि मुक्तकाख्यं काव्यमिदं शब्दसंयोजनायामभिधेयलक्ष्याद्यर्थानां सीमानमतिक्राम्यति ।

---

[1] 'ध्वन्यालोकस्य' द्वितीय उद्द्योतेऽलङ्काराणामपृथग्यत्ननिर्वर्त्यत्वं निम्नलिखितायां कारिकायां प्रतिपादितम्—

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ॥" (२–१७)

तस्मादतिक्रमणात्तथाविधे काव्ये शब्दार्थावुपसर्जनीकृत-स्वार्थौ स्वातिरिक्तं, यदनलङ्कृतमलङ्कृतं वाऽर्थान्तरमभिव्यङ्क्तस्तमेवार्थं ध्वने राद्धान्तस्य धौरेयाः क्रमशो वस्तुध्वनिरलङ्कारध्वनिरिति पदाभ्यां निर्दिशन्ति। अतीव सूक्ष्मस्य चीनाशुंकस्यावगुण्ठनेन किञ्चित्संवृतं, किञ्चिच्च विवृतं, सौन्दर्य-सार-श्रियाः कस्याश्चिद् रमण्या मुखचन्द्रस्यानुपमं रामणीयकमिव, वाक्यार्थस्य व्यङ्ग्यार्थाभिव्यञ्जन-तत्परं, सूक्ष्मं व्यवधानमधरीकृत्य, काव्येऽस्मिन् सहसा समुद्द्योतितं, वस्त्वलङ्कारध्वनीनामिदमलौकिकं सौन्दर्यं झटिति सहृदयानां चेतश्चमत्करोतीति निश्चप्रचम्।

अनुभूति–पक्षेऽपि, मुक्तकेऽस्मिन् काव्ये, स्वभावतो देश-काल-व्यक्त्यादि-सापेक्षाणामनन्तानां लौकिकानां भावानां, साधारणीकरणप्रक्रियया, कृत्स्नं पूर्वोक्तं सीमानमतिक्रम्य, सामान्य-मानवीय-भाव-भूमेः स्वरूपञ्चाङ्गीकृत्य, सहृदयानामञ्जसा यदाह्लादमय्या अनुभूते र्विषयत्वं सम्पद्यते, तदप्युपरिष्टाद् विशदीकृतमेव। तस्मात् पुरातनैराचार्यैः काव्यस्य लोकसमुद्भवापि या 'लोकातिक्रान्तगोचरता' सामाम्नाता मृत्यत्वेऽपि कवीनां यच्च 'क्रान्त-दर्शित्वं' प्रदर्शितं, तत्सर्वमप्यनेन मुक्तक–काव्यानां सूक्ष्मतया, परमार्थतया चानुशीलनेन, पर्यालोचनेन च प्रमाणितं भवति। मुक्तकमिदं काव्यस्योत्तमोत्तमां कोटिमाटीकृत इत्यपि 'ध्वन्यालोके' तल्लोचने च, रुद्रट-मम्मट-भोजराज-विश्वनाथादिभिरलङ्कारशास्त्रस्य धुरन्धरैराचार्यैः स्व-स्व-लक्षण-ग्रन्थेषु, गुणमुग्धतया, प्राकृतभाषायां निबद्धाभ्योऽपि, 'गाथासप्तशतीतो' ध्वनिकाव्यस्योदाहरणत्वेन, सादरं समुद्धृताभ्यो गाथाभ्य एव सिध्यति।

मुक्तककाव्यस्योपरि पर्यालोचितैः सम्पूर्णैरेव वैशिष्ट्यैः प्रतिपदं प्रतिपद्यञ्च शोभमाना, तद्व्यतिरिक्तमप्यात्मनः किञ्चिद् वैलक्षण्यमभिव्यक्तेः प्रतिपाद्य-विषयस्य च कामप्यभिनवां दिशं निर्दिशन्ती, श्रीमदुमाकान्तशुक्लमहोदयस्य 'मङ्गल्या'भिधाना कृतिरियं, पञ्चत्रिंशदधिकैकशतमिताभि र्मधुराभिर्गम्भीराभिश्चार्याभिः समुद्भासिता, क्वचित् कलेवरेण कलितलाघवाऽपि, प्रियतमविरह-विधुर-मधुराननश्रीः क्षामक्षामा, प्रेयसी तन्वीव, स्वकीयां कामपि विलक्षणामेवाभिख्यामादधाति; अन्यत्र सम्मिलन-रस-तरङ्गितान्तरङ्गा प्रोत्तुङ्ग-भावभूमिकामध्यारूढा, मान्मथोद्भेद–विजृम्भमाण–विविधानिर्वचनीय-

सुकुमारभावनासु संलीनतया, भ्रू विलास-गात्रविकारपुरःसराभिरनन्ताभिः प्रतिक्षणं भिद्यमानाभि र्यौवनच्छविभिः सौन्दर्यप्रभा-भङ्गीभिश्च सर्वतः सन्दीप्तेव प्रतिभाति; अपरत्रापरिमितागाध-कारुण्य-महोदधौ निमग्नोन्मग्नाऽरुन्तुदव्यथाकथास्वतीव विह्वला दरीदृश्यते। कुत्रचित् प्रकृतेरपि संश्लिष्टं, मानवीयभावनाभिश्च सम्पृक्तं, सजीवं चित्रणं प्रस्तौति। क्वापि च मार्मिकाभिरन्योक्तिभिः समासोक्तिभिश्च बाभासते। कविना स्वकीयां कवितामधिकृत्य काचिदभिनवा विचार-सरणिरप्यत्र प्रकाशिता वर्तते। तस्मात् 'देवस्य पश्य काव्य' मित्यादिश्रुते र्व्याख्यायां प्रतिपादितेन नयेन, जीवनस्य जगतश्च पूर्वनिर्दिष्टं तन्निगूढं परमार्थं सौन्दर्यञ्च साक्षात्कुर्वती, तच्च निजेन मनोहरेण केनापि संख्यानेन सम्यक्तया विवृण्वती, 'मङ्गल्ये'यं नूनं किमपि दिव्यत्वममृतत्वञ्चावहतीत्यस्मदीयं मतम्।

इयं मङ्गल्या हि 'ध्वन्यालोकस्य' मङ्गलाच'रण-श्लोके निर्दिष्ट, किमप्यपूर्वमेव वस्तु प्रथयति, क्रमात् प्रख्योपाख्या-प्रसरसुभगञ्चेदं ग्रावप्रख्यं जगन्निजरसभरात् सारयति भासयति च; अत एवात्र कविसहृदयाख्यस्य सरस्वत्याः परमतत्त्वस्य सम्पूर्णो विजयः सुचारुतया निष्पन्न इति विदाङ्कुर्वन्तु विद्वांसः। अस्य विजयस्य मूलभूतं तत्त्वन्तु कवेः प्रतिभया सह सहृदयस्य भावयित्र्याः प्रतिभायाः सम्पर्क एव। तस्मात् 'कल्यायां' मङ्गलाचरणे ऽधो ऽङ्किता ऽर्यापि चरितार्था भवति—

"यत्सम्पर्काद्वाणी कवितारूपं करोति भङ्गीभिः।
तत्सहृदयाङ्घ्रिधूलिं सश्रद्धं मस्तके कुर्वे॥" (पृ० ४)। इति।

अस्यां मङ्गल्यायां खलु शुक्लमहोदयस्य प्रतिभा-सुपर्णी, सर्वविधबन्धनेभ्यः सीमाभ्यश्चोन्मुक्ततयाऽपारे, मुक्तक-काव्याकाशस्य विस्तारे, स्वकीयानि प्रबलानि स्फूर्तिमयानि कल्पना-पतत्राणि धुन्वाना, परोक्षाण्यदृश्यानि क्षेत्राण्यवगाह्य,

---

(१) द्र०, 'ध्वन्यालोकः' (का० मा०, संस्क०, पृ०, १) :—

"अपूर्वं यद् वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरान् सारयति च।
क्रमात्प्रख्योपाख्या प्रसरसुभगं भासयति तत्,
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयतात्॥"

सहृदयेभ्यः कस्मादपि दिव्यलोकात्तं दिव्यमानन्दरसामृतमानयति, यदुपलभ्य, ते युगपदाप्यायिताः कृतार्थाश्च भवन्ति ।

ऋक्संहिताया एकस्यामृचि वसिष्ठ ऋषिः सूक्तरचना-विधिं सविस्तरं निर्दिशति—"यो वो॒ गतं॒ मन॑सा॒ त॑क्षदेत॒मूर्ध्वां धी॒ति॒ं कृणव॑द्॒धारय॑च्च" (७/६४-४)। अर्थात्, वाग्देवताप्रसादावेशानुप्राणितः कश्चिद् विपश्चिदृषिः स्वमनीषया विश्वस्य परमं रहस्यमधिगम्य, सर्वप्रथमं, किमपि सूक्तं ('मनसातक्षत्') मनसा संतक्ष्णोति, ततश्चोर्ध्वीभूतं तद् गुणालङ्काररसादि-सम्पद्विशिष्टेष्वभिनवेषु शब्देष्वनुनिबध्नाति ('ऊर्ध्वां धीतिं कृणवत्') अन्ते च ऋक्षु तदनुपमं परमञ्च रहस्यं सुरक्षितं कुरुते ('धारयच्च')। अस्याः सूक्त-संरचनाया यः परिणामः सञ्जायते, तमप्यन्यस्यां कस्यांश्चिदृचि दीर्घतमा ऋषिरुल्लिलेख, तथाहि-"नव्य॑न्नव्यं त॒न्तु॒मा तन्व॑ते दि॒वि स॒मु॒द्रे॑ अ॒न्तः क॒वय॑ःसु॒दीत॑यः ।" इति। (ऋग्वेद:, १/१५९-४)। फलतश्च—"सु॒प॒॑र्णं विप्रा॑ः क॒वयो॒ वचोभि॑रेकं॒ स॒न्तं ब॑हु॒धा कल्प॑यन्ति ।" (ऋग्वेदः, १०।११४-५)। इति श्रुतिः कविभिर्निजाभिरनेकाभि र्वचोभङ्गीभिरेकस्यैवान्तर्यामितया जगत्यनुप्रविष्टस्य 'सुपर्ण'[1]—तत्त्वस्य, अर्थात्, परब्रह्मणो, बृहतः शाश्वतस्य च सौन्दर्यतत्त्वस्य वा, बहुधा कल्पनं समाम्नाति। 'मङ्गल्यायां' आर्यास्वपि ऋक्ष्विव, सैव वैदिकी प्रक्रिया ऽनुसृतेति प्रतिभाति। अत्रापि कवेरस्यैकैव सा सौन्दर्य-भावना, कारुण्यभावना वा, निमित्तभेदाद्[2] बहुषु विविध-रूप-निर्माणेषु बहुशो विवर्तते। एवंविधस्य सुललितस्य रूप-निर्माणस्य

---

(१) ऋग्वेदे, 'द्वा सुपर्णा' 'यत्रा सुपर्णा अमृतस्य भागम्', 'दिव्यः स सुपर्णो गरुत्मान्' 'वयः सुपर्णा' 'एकः सुपर्णः स समुद्रमाविवेश' इत्यादिषु ऋक्षु 'सुपर्ण' इति पदं जीवात्मानं, परमात्मानमादित्यरश्मिं, गरुत्मन्तं वायुञ्चाभिधत्ते। व्युत्पत्तिनिमित्ताद् दिव्यं सौन्दर्यतत्त्वमप्यनेन 'सुपर्ण' इति पदेनाभिधातुं शक्यते। अतएव 'सुपर्णं विप्रा' इत्यादि श्रुतिः काव्यस्वरूपे ऽपि संगच्छते।

(२) द्र०, "एको रसः करुण एव निमित्तभेदात्' इत्युत्तररामचरिते भवभूतिः।

निर्देशो ऽपि निम्नलिखिताभ्यामार्थाभ्यां सुचारुतया कविना स्वयमेव कृतः—

"कविता शाब्दी मूर्तिः, पूज्यत एव प्रतिष्ठिता यदि सा ।
कुरु यत्नं तद् विपुषि, रूपे ललिते च निर्माणे ।।" (पृ०, ७)
"सौन्दर्यं परितो मां, कृतसौन्दर्यावगाहनश्चाहम् ।
यदि वाञ्छसि तत्पातुमुपविश मे चेतसि क्षणकम् ।।" (पृ०, ५)

लौकिकीयं कविता क्रौञ्चवधस्यारुन्तुदादतिक्रूराच्च व्यतिकरादादिकवे र्महर्षि-वाल्मीकेरप्रतिभापरिमिति-गम्भीर-कारुण्यभावनामध्याक्रान्ताया दिव्यप्रतिभायाः सहसोन्मेषात् प्रादुर्भूते त्यैतिह्यन्तु किलातिरोहितमेव मतिमताम् । 'मङ्गल्या'-यामपि 'कल्ये'ति शीर्षकालङ्कृते मङ्गलाचरणे "वन्दे प्रसन्नमधुरामाद्यकवेस्तां वियोगजां करुणा"मित्यादिपदैरेतदेवैतिह्यं सङ्केतितम् । एतमेव चार्थं कविताया आत्मपरिचयेऽपि कवि र्निम्नाङ्कितैः शब्दैः प्राह—

करुणाऽऽद्या मे माता, विरहो जनकः सहोदरः शोकः
उत्कलिका च वयस्या, कविताऽहं चञ्चला बाला ।।" (पृ० ७)

अत्र कवे र्मुग्धमुग्धा ऽथो निर्दिष्टा याचनापि प्रासङ्गिक्येव—

"अश्रुकणं त्वां याचे, करुणावरुणालयं च याचे त्वाम् ।
उत्कलिकां त्वां येन काव्यलता स्यात् सुपल्लविता ।।"

"अत्र बहून् याचते कविः । एकमश्रुकणमपरं करुणावरुणालयमितरञ्चोत्कलिकां याचते । काव्यलता-पल्लवने ऽश्रुकणादीनां कारणत्वमिति तद्विश्वासः" ('प्रियम्वदा', पृ०, ५) । तस्मात् संस्कृतकविताया अक्षय्यमाद्यं स्रोतः, कारुण्यभावना ऽप्येतासु 'मङ्ल्याया' आर्यासु मौलिकीं प्रेरणाभूमिरिति निर्विवादमभिधातुं शक्यते । स्वकीयां पीडामधिकृत्य, 'शोकः श्लोकत्वमागतः' इति रामायणस्य (बाल० ३/४०) सूक्तिञ्चोद्धृत्य 'ललामके' कवि र्ब्रवीति—

"कारुण्यं गृहमस्या, बाष्पो रमणस्तथा स्मृतिः सुषमा ।
नन्दत्वनन्तकालं, पीडा मे प्राप्तसम्बन्धा ।।"
पीडाङ्कुरमुद्भूतं, रक्षत रक्षत कवित्वतत्त्वज्ञाः ।
यत्संस्पृष्टा वाचः, स्फुरन्त्यसंख्येयसंख्यानैः ।।" (पृ० १७)

एतदप्यार्या-द्वयं पूर्वोक्तमेवार्थं समर्थयतीति तु सुस्पष्टमेव ।

पूर्वं निर्दिष्टैः कुण्ठासंत्रासयातनादिभि र्विविधैर्हेतुभिः प्रादुर्भूता, विश्वस्य जगतो विश्वेषां प्राणिनां नानारूपा, सीमारहिता ऽनन्ता च पीडेयं यदा ऽपूर्व-

प्रतिभा-समन्वितस्य कवेरस्य विशिष्टां संविद्भूमिमध्यारोहति, तदा सा तस्यै स्वकीयैव पीडा प्रतीयते, तटस्थभावेन ममत्वादिसीमाराहित्येन च समवलोकिता पीडेयं जगत्यनिशमनुभूयमानस्यानन्तदुःखस्य सान्निध्यात् कारुण्यभावनायाः स्वरूपं धत्ते, आनन्दरूपायाश्चानुभूते विषयत्वमापद्यते। ममत्वादिसीमाजन्यं हि सर्वमपि दुःखमिति सम्भवदुक्तिकं प्रतिभाति, यदा च तत् साधारणीकरणान्ममत्व-रहितायां परिमित-प्रमातृ-भाव-विरहितायाञ्च भावभूमौ साधारण्येनानुभूतये, तदा तस्यानन्दरूपतया परिणतिः सहजा स्वाभाविकी चेति पीडायामप्यानन्दमय-ताया रहस्यम्, तर्दव च शोकः श्लोकत्वमागतः इति वचोऽपि सारवद्भवति। अतएव "नन्दत्वनन्तकालं पीडा मे प्राप्तसम्बन्धे' ति कवे र्वाचोयुक्तिरपि संगच्छते। पूर्वमुद्धृताया अस्या आर्यायाः पूर्वार्धे 'कारुण्यं गृहमस्याः' इत्यादिभिः पदैरस्याः पीडायाः सम्बन्धप्राप्ते र्विवरणमपि प्रस्तूयते। ततश्च पीडाङ्कुर प्रादुर्भावस्य कथा, काव्यतत्त्वज्ञैश्च तत्संरक्षणस्य प्रार्थना, तस्याः पीडाया संस्पर्शाच्च वाचामसंख्येयसंख्यानैः परिस्फुरणमिति सर्वमपि युक्तियुक्तमेव प्रतिभाति। भावावेशवशाद् वाचामेवंविधस्य परिस्फुरणस्य कानिचिन्मर्मस्पृङ्मनोरमाणि निदर्शनान्यत्र स्थालीपुलाकन्यायेनाधस्तात्समुद्ध्रियन्ते —

"निर्वेदस्तु सतीर्थ्यः पीडा भार्या सखी च मे करुणा।
बन्धुः स्फीतो बाष्पश्छन्नं च मनोमयं राज्यम्॥" (पृ० १८)

"सोऽस्मि तटो हतभाग्यः सकृदेवापः समागता यत्र।
स्मृतिसिकताशतरेखाः सन्ति न सरसाः पुनर्धाराः॥" (पृ० १८)

"अधरे स्मितजह्नुसुतां, करुणा-यमुनां सरस्वतीं स्निग्धाम्।
बिभ्राणा कासि शुभे, तीर्थतटी, गीतिका, पीडा?"
(पृ० १६)।

"त्वं पीडाहं विरहः, करुणा त्वं शोकसागरश्चाहम्।
त्वं कवितासि रसोऽहं, रेखा त्वं चित्रपट्टोऽहम्॥" (पृ० २३)

निर्वापिताः प्रदीपाः, विरसा नद्यस्तटाश्च निपतन्तः।
हन्त! कथामतिगूढां, ब्रुवते चित्तस्य विवशस्य॥" (पृ० १३)

प्रकृतिं मानवजीवनञ्चाधिकृत्य सौन्दर्यभावनाया. वैविध्यमप्यस 'मङ्गल्यायां' दर्शनीयं मनोहरञ्च संवृत्तम्, तथाहि—

"नूतनपल्लवरागं, पाटलगन्धं वसन्तलावण्यम् ।
आसवसक्तं कृत्वा, रचिता सौन्दर्यसीमाऽसौ ।।" (पृ०, १४) ।
"मन्दो मन्दः पवनः, रम्या रजनी सुगन्धसञ्चाराः ।
नेत्रैः पेया ज्योत्स्ना, त्वत्स्मरणं मरणमेवाद्य ।।" (पृ०, २०)
"कूजति कोकिलसार्थो, गुञ्जति भृङ्गावली च मधुमत्ता ।
मन्ये पल्लविता स्याद्, वल्ली काऽप्यद्य सम्भ्रान्ता ।।"
(पृ० ३०) ।

अत्र सर्वेष्वपि पद्येषु पूर्वार्धे सम्मोहकः प्राकृतिकः परिवेशस्ततश्चोत्तरार्धे तं दर्शं दर्शं सहृदयानां यादृशी मनोदशा सम्पद्यते, सापि, विशदार्थाभिव्यञ्जनप्रवणेन शब्दलाघवेन, निपुणतया निर्दिश्यते । प्रथमे पद्ये 'आसवसक्तं कृत्वे'ति पदाभ्यां प्रकृतेः पूर्वनिर्दिष्टस्य परिवेशस्य विलक्षणा मादकता, तया च विभाव्यमानमनुपमं सौन्दर्यं, तस्य सौन्दर्यस्य च 'असौ' इति पदेन केवलमनुभवैकगोचरत्वं भाषायामव्यपदेशविषयत्वञ्च ध्वन्यते । द्वितीये पद्ये 'नेत्रैः पेया' इति लाक्षणिकाभ्यां पदाभ्यां ज्योत्स्नाया अप्रतिमाऽपरिमिता च शोभा संलक्ष्यते, तदवस्थायाञ्च प्रियतमाविरहस्यासह्यतातिशयः प्रतीयते । तृतीयेऽपि पद्ये 'कापि सम्भ्रान्ता वल्ली पल्लविता स्या'दिति पदैस्तस्या वल्या असौ यौवनातिशयः सुषमातिशयश्च समुद्भासते, येनोन्मत्तः कोकिलसार्थोऽनवरत कूजति, 'मधुमत्ता' भृङ्गावली च निरन्तरं गुञ्जति । 'काऽपि वल्ली' इत्यादिपदैश्चात्रालौकिकसौन्दर्यशालिनी काऽपि प्रेयसीति सुतरां ध्वनितं भवति, तस्याश्चेतश्चमत्कृतिविधायिनीं मधुरां सर्वातिशायिनीञ्च सौन्दर्यच्छटां दृष्ट्वा रसिकस्य यादृशी सम्मुग्धा निस्तब्धा च दशा सम्भाव्यते, सा तु सर्वथैवानुमानस्य विषयतामतिक्रामति । अमुमेवार्थं भङ्ग्यन्तरेण निम्नलिखिताऽऽर्याऽपि निर्दिशति—

"पल्लविता का वल्ली, लीलां यस्या निभाल्य भृङ्गाली ।
मत्तालीव समन्ताद्, भ्रान्तोद्भ्रान्तेव कान्तारे ।।" (पृ० २९)

अत्र समुचितेनानुप्रासेनालङ्कृता पदशय्याऽपि किमपि मनोरमं सौष्ठवमवगाहते ।

रूपकादीनामर्थालङ्काराणां संयोजनेन संश्लिष्टं सजीवञ्च प्रकृतिचित्रणमेतत् कामप्यपरामेव चारुतां धारयति, तथाहि—

“अह्न्युष्णं निशि शीतं, माधवमित्रं न मत्कृते योग्यम् ।
इति तद्बद्धा प्रकृतिर्हन्तोच्छ्वासान् समुत्सृजति ॥” (पृ०, २७)

अत्र रूपकानुप्राणिता समासोक्तिः सद्य एव सचेतसां चेतांसि चमत्करोति । वसन्तस्य दिवसेषु किञ्चिदुष्णता निशासु च काचिच्छीतताऽनुभूयते । ‘माधवो वसन्त एव मित्र’मिति माधवे मित्रत्वस्य समारोपादत्र रूपकम् । मित्रे नपुंसकलिङ्गतायाः प्रकृतौ च स्त्रीलिङ्गताया अनुसन्धानाद्, ‘अह्न्युष्णं निशि शीत’मित्यादि विशेषणसाम्याच्च, माधव-प्रकृत्योरुपरि नायकनायिकयोर्व्यवहार-समारोपोऽप्यत्र स्वाभाविक एव । अतएव ‘प्रियम्वदा’—“मित्रं हि नपुंसकलिङ्गम् । नपुंसकश्च जनो दिवसे कामादिविषये सोत्साहोऽपि रात्रौ सहवासे शैथिल्यं भजते” (पृ० २७) अर्थादेवंविधं ‘मित्रमह्न्युष्णं निशि च शीतं भवति’, तत्सम्बद्धा चात्र कामिनीव प्रकृतिः । ‘तद्बद्धे’ति पदेन तादृशं मित्रं प्रति तस्या अनुरागाभावो विवशत्वञ्चाभिव्यज्यते । अतएव नैराश्यातिशयात्तस्या अन्तर्निगूढा व्यथा, असहाया चावस्थाऽप्यनुमातुं शक्यते । फलतः, ‘हन्तोच्छ्वासान् समुत्सृजती’त्यनुभावोऽप्यत्रसार्थकतां मार्मिकताञ्चाधिगच्छति । सर्वोऽप्ययं चमत्कारोऽचेतने माधवेऽचेतनायाञ्च प्रकृतौ चेतनवृत्तान्तयोजनया सम्पन्न इति तु विदितमेव मतिमताम् ।

“तन्वीं प्रकाशशाखामध्याक्रान्तोऽन्धकारगृध्रोऽसौ ।
धुन्वन् कृष्णान् पक्षान्, तिमिरे लोकान् निपातयति ॥” (पृ० ४८)

निरवद्येऽस्मिन् पद्ये प्रकृतिवर्णनस्य काप्यभिनवैव पद्धतिराविष्कृता शुक्लमहोदयेन । अत्र प्रकाशे शाखाया, अन्धकारे गृध्रस्य, कृष्णपक्षेषु च कृष्णानां पक्षाणां समारोपणात्साङ्गं परिम्परितं रूपक विलसति । गृध्रस्य च स्वभावोऽयं यत् स कस्मिंश्चिद् वृक्षे कामपि तन्वीं शाखामध्याक्राम्यति, स्वकीयान् कृष्णान् पक्षांश्चाजस्रं धुनोति । किन्तु तस्य पक्षिणः स्वभाववर्णनमत्राप्रस्तुतं, प्रकृतिवर्णनमेव प्रस्तुनम् । अत्राचेतनेऽन्धकारे चेतनस्य गृध्रस्य व्यवहारः समारोप्यते । “भावानचेतनानपि चेतनवत्···व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया” (ध्वन्या०, काव्यमाला संस्क० ३ उद्द्योतः, पृ०, २७८) इत्यानन्दवर्धनाचार्यस्य सूक्तिरत्र सम्यक्तया सञ्जाघटीति ।

“कृतसागरावगाहो मेघ-विहङ्गः समुत्पतन् गगने ।
अहह मनोरमबिन्दून् विधूय पक्षान् किरत्यवनौ ॥” (पृ० ३०)

"यौवनमाप्ता ज्योत्स्ना भ्रमयति रसिकानहो विटांश्चतुरान् ।
आलिङ्गन्ती सर्वान्, कञ्चुलिकां तामसीं क्षिप्त्वा ॥"
(पृ० ३२)

"मन्ये प्रकृतिसुगृहिणी, तमांसि बद्ध्वा प्रकाशवस्त्रेषु ।
क्षेप्तुं पूर्वाशातः पश्चिमकाष्ठां द्रुतं याता ॥" (पृ० ३९)

इत्यादिषु पद्येष्वपि तथाविधमेव पर्यालोचनमनुसन्धेयम् । इयांस्तु विशेषो यदन्तिमे पद्यद्वये मानवीयकरणस्य प्रक्रियोररीकृता ।

क्रैस्ते १९७५ सम्वत्सरे विरचितासु 'वाशितम्' इति शीर्षकेण समलङ्कृतास्वार्यासु प्रकृतिवर्णनस्य काचिदन्यैव विधा संदृश्यते । अत्र सर्वविधात् सामयिकपरिवेशादुपमानानि गृहीत्वा प्रकृतिवर्णनं प्रस्तुतम्, तथाहि—

"येयं कुमुद्वती सा, प्रातर्म्लाना विलोक्यते दीना ।
तिलतण्डुलचिन्तायां विभवविहीना यथा गृहिणी ॥" (पृ० ३६)

"पूर्वस्यां दिशि विरलास्ताराः काञ्चन विलोकिता दीनाः ।
संसदि बहुमत-पक्षे, यथा भवन्त्यल्पसंख्याकाः ॥"
(पृ० ३७)

अत्रोपमायां लिङ्गवैषम्यमप्यापतितम् ।

"उत्पतितानि वयांसि, व्योम्न्युद्यत्किरण-राग-रक्तानि ।
निर्वाचन-प्रचारे, यथा समुद्घोष-पत्राणि ॥"
(पृ० ३८)

इत्यादिषु पद्येषु 'वाशितम्' अर्थात् पक्षिणां कलरवोऽयं जगतः परिस्थितिविशेषमपि प्रतिध्वनयन् वस्तुतः सुन्दर एव संवृत्तः ।

ज्योत्स्नाऽपि बहुशोऽत्र कवेः प्रतिभासंरम्भगोचरतामध्यास्ते, फलतो 'बन्धूकः' इति शीर्षकं दत्त्वा, तस्या बहूनि मनोहराणि लोहितानि रूप-पुष्पाण्यत्रावचितानि । प्रथमे पद्ये (पृ० ३२) सा तामसशुक्तितः समुद्गता रम्या मुक्तेवाभाति । अन्यत्र सा समुड्डीना दिव्या हंसीव दिगन्तं व्याप्नोति, तस्या ज्योतिश्च गड्डलिकेव रोदसीरन्ध्रं प्रपूरयति । ततश्च प्रतिपत्रमूर्ध्वे पटले सा रुचिरा राधेव विराजते, तस्याञ्चाधस्तादवगुण्ठितोऽन्धकारस्तु विपरीतरतौ कृष्णत्वमधिकरोति (पृ० ३३) । अस्यामार्यायां मुक्तककाव्यानां घोरशृङ्गारपरम्पराऽनुसृतेति प्रतिभाति ।

'पर्णे पर्णे तस्याः स्फुरितं प्रकाशराशिमवलोक्य केचन प्रहृष्टा अपि भवन्ति, किन्तु किन्ते तत्र विलीनां गम्भीरां पीडारूपां तमोलीलामपि द्रष्टुं प्रभवन्ति ?" "सन्त्येवं विधा अपि धीरा ये स्वकीयामुत्कटामपि हृद्वेदनां प्रसन्नता-प्रकाशैस्तिरोहितां कुर्वन्ति। न चेतरे तदाकलने क्षमा भवन्तीति" 'प्रियम्वदातो'ऽत्र वस्तुध्वनिरूपः कश्चिद् विलक्षण एवार्थोऽप्यनुसन्धेयः। सप्तमे पद्ये 'कान्तिकणान् विकिरन्ती ज्योत्स्नेयं शिखरेभ्य उत्पतिता' 'तत्रैव च सहसा सम्भ्रमं प्राप्ता' पारावतानां पंक्तिरिव प्रतीयते। ज्योत्स्नाकलिते देशे वृक्षानधोऽधोऽवस्थिता छायाऽपि नैव समुपेक्षिता कविना। सा पयसां पल्वले सानन्दं पतितानां कृतफेनानां महिषीणां, विशुद्धं ग्रामीणं, सश्लिष्टं बिम्बग्राहि च दृश्यं सहृदयानां पुरस्तात् समुपस्थापयति (पृ० ३४)।

"धवल-किरण-गुणनद्धैः क्रीडनकैर्मेघतूलकृततनुभिः।
क्रीडति शशाङ्कबालः कृतकलहासोऽम्बरे भवने॥" (पृ० ३५)

अस्यामप्यार्यायां शशाङ्के कृतकलहासस्य बालस्य, अम्बरे च भवनस्य समारोपणं विधाय, 'धवल-किरणगुणनद्धैर्मेघतूलकृततनुभिः क्रीडनकैः'स्तस्य या बालक्रीडा, कवेरस्य विशिष्टया संविदा सम्दृब्धा, सा तु जीवने, पथि पथि, वीथ्यां वीथ्याञ्च परिदृश्यमाना कान् सहृदयानानन्दतुन्दिलान् न विदधाति ? अनेन पर्यालोचनेन प्रकृतिवर्णने श्रीशुक्लमहोदयस्य महती सूक्ष्मेक्षिका तदभिव्यक्तौ च नवनवोन्मेषशालिनी विविधायामवती प्रौढता, अनुभूतेश्च महद्गाम्भीर्यं, परिस्फुटीभवति।

प्राचीनेषु मुक्तकेषु शृङ्गारोऽङ्गी। स च तत्र निर्मर्यादो निरावरणश्चोच्छृङ्खलं परिखेलतीति विदुषां विमर्शः। 'मङ्गल्या'यां शृङ्गारस्य प्रपक्त्रिमः शालीनः समर्यादश्च परिपाकः साक्षाद् विग्रहवानिव सम्पन्नः। शृङ्गार-सतरङ्गणीतः काश्चन लहर्योऽत्र समुद्ध्रियन्ते—

"ते कथयन्ति यदस्या अलकाधरनयनजघनवक्षोजैः।
षोडशशरद्भिराप्तो गतदिवसे परिचयः सकलैः॥"
"रूप-सुवर्णैषणिका तदङ्गयष्टिर्विलोकिताऽस्माभिः।
यत्र सुबद्धा दृष्टि र्नान्यासक्ता भवत्यद्धा॥" (पृ० १५)
'सौन्दर्यं ते भावान् दिव्यां ते वा विनोद-वैदग्धीम्।
वाञ्छामि शतं जनुषां, पातुं ते माधुरीधाराः॥" (पृ० २०)

"अङ्कुरितं कण्टकितं, पल्लवितं कुसुमितं फलितमङ्ग ।
सौन्दर्यं तेऽस्माकं, चेतसि गन्धं तनोत्यधुना ॥ (पृ० २२)
"हस कुमुदानि हसेयु जृम्भस्व शुभे लसतुतरां वल्ली ।
आलप मामतिशनकैरुच्छ्वसितं गीतकं भूयात् ॥" (पृ० २०)
"हस्ते चषकश्चषके, मदिरा तस्याञ्च वीक्षितं मदिरम् ।
रचयसि भाग्यमहो मे, रसिके मदिरास्रजः सर्वाः ॥" (पृ० ११)

एषु पद्येषु पूर्वोक्तानां, मान्मथोद्भेदविजृम्भमाणानां विविधानां सुकुमारभावनानां यौवनच्छवीनां सौन्दर्यप्रभाणाञ्च सुन्दरः समुन्मेषः संयोगशृङ्गारं चारुतयाऽभिव्यनक्ति । एवंविधे वर्णने मानवीयान्तःप्रकृते र्बाह्यप्रकृतेश्च तादृशं मनोरमं तादात्म्यं सामञ्जस्यञ्च संघटते, येन मर्मस्पृक् संवेदनामादधाना, मानवीयभावैरनुभावैश्च सक्रियमनुरञ्जिता प्रकृतिरपि विविधाभिर्भङ्गीभि र्निजां सहानुभूतिमावेदयन्ती, सजीवेव सप्राणेव च प्रतीयते । अनुपमसौन्दर्यशालिनी सा नायिका यदि व्यस्तान् निजकेशान् संहर्तुं व्यवसिता स्यात्तदा तस्या एवं विधायाश्चेष्टायाः प्रकृतौ का प्रतिक्रिया भवेदिति निम्नलिखितायामार्यायां चारुतया निर्दिष्टम्—

"मेघाः कृतप्रयाणाः, ज्योत्स्ना क्षीणा मदोऽपि मन्दः स्यात् ।
व्यस्तान् यदि निजकेशान्, संहर्तुं व्यवसिता सा स्यात् ॥' (पृ०, १६)

उपर्युद्धृतायां—"हस कुमुदानि हसेयु जृम्भस्व शुभे लसतुतरां वल्ली" इत्याद्यार्यायामपि तादृश्येव प्रकृतेः प्रतिक्रियोल्लिखितेति तु स्फुटमेव ।

अस्मिन्नेव सम्मिलनप्रसङ्गे 'आवाम्' इति शीर्षकमधिकृत्य, महाकवेः कालिदासस्य 'वागर्थाविव सम्पृक्तौ' इति दिव्यां सूक्तिञ्चोद्धृत्य, द्वयोरपि कयोश्चित् खलु सर्वथैवैकीभावमभिव्यञ्जयन् 'अर्धनारीनटेश्वर'-न्यायेन किञ्चिद् विलक्षणमेवाचिन्त्यं भेदाभेदवादं विरचितवान् कविरयम् । तन्निदर्शनभूतमार्याद्वयमधस्तान्निर्दिश्यते—

"त्वं कविताहं भावस् त्वं वीणा चेदहं ध्वनि र्मधुरे ।
त्वं यात्राहं मार्गस्त्वं धाराहं तटस्तरले ॥" (पृ० २२)

+ + + +

"प्रस्तावनासि रम्या दिव्योऽहं नाट्यवस्तुविन्यासः ।
त्वं चेत् कार्यावस्था, तद्ग्रथितः सन्धिबन्धोऽहम् ॥" (पृ० २४)

विप्रलम्भश्रृङ्गारमप्यधिकृत्य काचिदभिनवैव वर्णनपद्धतिः प्रादुर्भाविता कविना । तथाहि—

“अनुकूला मधुरा त्वं, प्रतिकूला यदि मधुरतरा हन्त ।
क्षणकं चेन्नु तटस्था, मधुरतमा नात्र सन्देहः ।।” (पृ० २१)
“हृदयेन समुच्छ्वसितं, रुदितं नेत्रेण कम्पितं वपुषा ।
हसितमहो अधरेण, सखि जाते त्वत्कथासङ्गे ।।” (पृ० २१)
“स्मृत्वा ममापि मधुरे, कच्चिन्नेत्रे न वारि ते जातम् ।
नो स्मर्यते स कालो यस्मिंस्त्वं न स्मृताऽस्माभिः ।।” (पृ० १९)

आत्मानं निर्दिश्यार्याद्वयमिदं दरमुकुलितलोचनमास्वाद्यतां सहृदयैः—

“नहि ते मधुरा दिवसा, न हि सा रजनी, न चापि ता वार्ताः ।
अद्य न कस्यचिदस्मि भ्रान्तोमेघोऽहमाकाशे ।।” (पृ०, १८)
“वारिणि तुषारखण्डो यथा गलाम्यनवलोकितः कैश्चित् ।
विगतक्षण इव शनकैः, कदापि गन्तास्मि निःशब्दम् ।।” (पृ०, १९)

भावाभिव्यञ्जनस्याधुनिकीं प्रतीकपद्धतिमाश्रित्य, मर्मस्पृशः काश्चनार्या अत्र संगृहीताः—

“परितो झंझावाता उल्काभूमि र्नवाङ्कुरोत्फुल्ला ।
क्व नु विकिरति निजबिन्दूनुदितः सौन्दर्यमेघोऽयम् ।।” (पृ०, १४)
“सविषाः सभोगकुटिलाः, अथो अकर्णाश्च कञ्चुकाकलिताः ।
सर्पेतः सर्पेतः, सर्पा देशेऽत्र सर्पन्ति ।।” (पृ०, ४४)
“केचन तरङ्गरङ्गं, बुद्बुद मन्ये, जलानि वै चान्ये ।
विरला स्तद्गाम्भीर्यं पश्यन्त्यम्भोनिधिं याताः ।।” (पृ०, ४५)

काश्चन मर्मस्पृश अन्योक्तयोऽप्यत्र 'मङ्गल्यायां' बाभासन्ते । ताश्च मूल एव निभालयन्तु सहृदयाः । विस्तरभयान्नात्र ता विविच्यन्ते ।

। । ।

“अपाम सोमममृता अभूम” (८/४८–३) इति भगवती श्रुतिः । तस्मात् यज्ञेषु काचित् सोमपानपरम्परा तावदार्येषु प्रचुरप्रचाराऽऽसीदिति निश्चितम् । ऋग्वेदसंहितायास्तु सम्पूर्णमेव मण्डलमेकं पवमानसोमविषयकं विद्यते । सा वैदिकी परम्परा पारसीकभाषाया उमरखय्यामादिकवीनां कवितायां 'मधुशालां'

‘मदिरां’ ‘मदिराक्षीञ्चाधिकृत्य, चारुतया प्रतिविम्विताऽभूदिति मे प्रतिभाति। किन्तु, न जाने, कस्माद्धेतोः संस्कृतकवितायां सा सर्वथैव समुपेक्षिताऽभवत्। सम्भवतः, सर्वप्रथममस्यां ‘मङ्गल्या’यामेव, ‘चषकः’ इति शीर्षकं दत्त्वा, “सग्धिश्च मे, सपीतिश्चमे” इति यजुर्वेदस्य सूक्तिञ्चोद्धृत्य, विषयेऽस्मिन् मनोरमाः काश्चिदार्याः समाकलिताः। मङ्गलाचरण एव कविः प्रस्तौति—

> “ये पूरयन्ति शाब्दे, चषके सततं मदोत्कटां मदिराम्।
> वाणी नृत्यति येषां रङ्गे तेऽस्मत्समाराध्याः॥”

‘प्रियम्वदाया’ मत्र ‘मदिरादि’ प्रतीकानामर्थं एवं स्पष्टीकृतः, “मदोत्कटां मदिराम् = रमणीयमर्थमित्यर्थः। रङ्गे रङ्गभूमौ तात्स्थ्यात् सभ्यसमूहे।” (पृ०, ४) इति। ‘चषके’ऽस्मिन् प्रथमाभिः षड्भिरार्याभि र्जीवनस्य सुखानां क्षणभङ्गुरतां प्रति किञ्चिदतीव कटु, तीक्ष्णमुत्कटञ्च ‘व्यङ्ग्यं’ सहृदयानां प्रतीतिपथमवतरति। अस्य प्रथमे पद्य एव ‘प्रियम्वदायां’ ‘चषकः’ निर्विण्ण-जीवनस्य प्रतिनिधिरिति कविः स्वयमेव कथयति। तृतीये चतुर्थे च पद्ये ‘रिक्ताः सर्वे चषकाः’, पञ्चमे ‘हन्त विदीर्णः कथं चषकः’, षष्ठे च ‘सर्वे चषका भवन्ति सच्छिद्राः’ इत्यादिभिः पदै र्जीवने ‘सर्वसुखराहित्यं’ कस्यचिन्महान् निर्वेदश्च प्रतिपाद्यते। मानवीयेऽस्मिन् जीवनेऽकस्मादेव कस्मादपि कारणात्, प्रक्रान्ते रागे रसे चाशनिसम्पात इव भङ्गः समापततीति सुमहत् तथ्यमप्यत्र वलवत्तया प्रतीयते।

अवशिष्टास्वार्यासु मधुशालायाः परिवेशः साक्षादेव प्रत्यक्षीभवति। मदिराया महती मादकता, मदिराक्षीणां मनोज्ञाभङ्गयः, तासाञ्च मदिरं वीक्षितं, सर्वमपि हृदयङ्गममतीव सम्मोहकञ्च सञ्जायते। ‘चषको’ऽयं संस्कृतकवितायाः किमप्यभिनवं, समृद्धञ्च क्षेत्रं प्रकटीकरिष्यतीति सुनिश्चितमेव। अन्ते च ‘मङ्गल्यायां’ प्रतिपाद्यविषयस्य ‘कल्योदन्या-काकली-चषक-प्रतिसीरोत्कलिका-मणित-ललामक-कोलम्बादिशीर्षकै विभाजनमपि कवेरनुपमां मनीषां प्रकाशयति। प्रत्येकं शीर्षकस्य चाधस्तादुद्धृता प्राचीन संस्कृतवाङ्मयस्य कापि मनोरमा ऋतम्भरा च सूक्तिः कामपि केन्द्रीयां सामान्यां भावभूमिमभिदधती सर्वथा सर्वबन्धनेभ्यो विनिर्मुक्तान्यपीमानि पद्यानि स्थूलतया परस्परं निबध्नाति। ‘आर्यासप्तशत्या’माचार्यगोवर्धनेन स्वीकृतः ‘अकरादिव्रज्याक्रमः’ सर्वथा कृत्रिमो बाह्यश्चासीत्। तमपहायो-

पर्युक्तेन क्रमेण विषयस्य विभाजनं कवेर्विष्टायाः संविदोऽभिव्यञ्जकं साभिप्रायञ्च संवृत्तमित्यत्र नास्ति कापि संशीतिभीतिः ।

अस्यां भूमिकायां दिग्दर्शनमात्रमभिलक्ष्य, 'मङ्गलायाः' कानिचित् पद्यानि समीक्षानिकषे परीक्षितानि, तानि चापूर्वाणि रत्नान्येव सिद्धानि । तस्मादस्या भूमिकाया उपक्रमे यत् किलावोचाम यदियं 'मङ्गल्या' मुक्तक-मौक्तिकानां कापि भास्वरा मालैव सम्पन्नेति तद्वचसो याथार्थ्यमनवद्यता च सिध्यति । वस्तुतस्तु 'मङ्गलाया' अपूर्वं सौन्दर्यमियत्तया परिच्छेत्तुं न शक्यते ।

समासतो 'मङ्गल्ये'यं प्राकृतिक-दृश्यानां सजीवेन मनोहरेण च चित्रणेन, मानवीयान्तःप्रकृतेरपि सालङ्कारेण स्वाभाविकेन च विश्लेषणेन, भाषाया रमणीयतया, भावानां विचाराणाञ्च गाम्भीर्येण, शृङ्गारकरुणरसयोश्च केनापि पक्त्रिमेण परिपाकेन, मनोरमया कयाप्यभिव्यञ्जनयाच कामपि सर्वाङ्गीणां सौन्दर्य-सम्पदं किमपि दिव्यं वैशिष्टयञ्चाधिकरोति । मुक्तक-काव्यानां कृते च बहुषु क्षेत्रेषु कामप्यभिनवां दिशमुद्घाटयति । अतः संकलनमिदं सुरभारत्या काव्यमयं वाङ्मयं भृशं समृद्धं विधास्यतीति सुदृढोऽस्माकं विश्वासः ।

स्वकीयस्याभिधानस्यान्वर्थतां बिभ्रतीयं 'मङ्गल्या' संस्कृतसाहित्यस्य विस्तृतं प्राङ्गणं स्वकीयेनालौकिकेन सौरभेण परितः सुवासितं विदध्यादिति करुणावरुणालयं याचामहे । आशास्महे च यद्विलक्षणशेमुषीकस्तरुणः कविरयं प्राय एकशतीमिमां 'मङ्गल्यां' शौक्ल्यं सप्तशतीत्वमाधातुं प्रयतिष्यते । यदि च 'प्रियम्वदा' प्यागामिनि संस्करणे टिप्पणीत्वमपहाय, आर्यास्विमासु निगूढानां भावानां, विचाराणां, रसादीनाञ्च रहस्यं परिस्फोरयन्ती, प्रौढं टीकात्वमाटीकमाना विद्योतेत, तदा कवेरस्येयमतीव साधीयसी सन्धा सफला सम्पद्येत, साहित्यिकञ्च जगद्भृशमुपकृतं भवेत् । भविष्यत्यपि कविरयं निरन्तरं निजाभिरभिनवाभिर्मनोरमाभिश्च रचनाभिः कुलक्रमागतां वाग्देवतामाराधयिष्यतीति कामायमाना विरमामः ।

* श्रीहरिः *

मङ्गल्या

[संस्कृतमुक्तकरचना]

प्रियम्वदाख्यपादटिप्पणीसमन्विता

कल्या

भूयिष्ठां ते नम उक्तिं विधेम । ऋग्वेदः, १।१८९।१

(१)

यत्कृपयाऽखिलदुरितं
दलितं तूर्णं पलायते दूरम् ।
जयति सदा स गणेशः
सद्गुणगणपूजितो नित्यम् ॥
३।११।१९६२

॥ श्रीः ॥

प्रियम्वदा

करोति तिलकं भाले नयने कज्जलं तथा ।
कुरूपाऽपि विरूपाऽपि नारी सौभाग्यरूषिता ॥१॥
सैषा मे टिप्पणीदाने प्रवृत्तिर्नोज्झितक्रमा ।
सीमन्तेऽल्पापि सिन्दूर-रेखा किं नो शुभावहा ॥२॥
न विद्वान्नो कविश्चाहं न चालोचकतल्लजः ।
केवलं वाग्वयस्यायाः पत्रभङ्गिर्विलिख्यते ॥३॥

१. यदिति । दुरितम् । गत्यर्थकादिण्धातोः 'नपुंसके भावे क्तः' (पा० ३/३/११४) इति क्तः प्रत्ययः । दुष्टमितं = गमनमनेनेति दुरितम् । जयति । 'जि जये' । जय उत्कर्षप्राप्तिः । अकर्मकोऽयं धातुः । यस्त्वभिभवार्थो जिधातुरसौ तु सकर्मकः । यच्चोक्तम् —जयिर्जयाभिभवयोराद्यर्थेऽसावकर्मकः । उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः ॥इति ॥ जयत्यर्थेनोत्कर्षेण नमस्कार आक्षिप्यत इति तं प्रत्यस्मि प्रणत इति च लभ्यते ॥

(२)

वन्दे प्रसन्नमधुरा-
माद्यकवेस्तां वियोगजां करुणाम् ।
यत्संयुक्ता युक्ता
जाता रामायणे वाणी ॥
८।४।१९७४

(३)

योगक्षेमं वहति
प्रतिदिनमस्मत्कुलस्य यत्काव्यम् ।
तस्मै रघुकाराय
प्राभृतकं मे नमो भूयात् ॥
२१।८।१९७५

प्रियम्वदा

२. करुणाम् । 'कृ विक्षेपे' इत्येतस्माद्धातोः 'कृवृदारिभ्य उन इत्युणादिसूत्रेणोनन्प्रत्ययः । 'करुणा तु कृपायां स्यात्' इति हैमः । इयं काव्याधिष्ठात्री देवीति वन्द्यते । 'मा निषाद प्रतिष्ठाम्' इत्यादि, 'शो श्लोकत्वमागतः' इत्यादि चात्रानुसन्धेयम् । युक्ता । 'युज समाधौ' । क्तः प्रत्य समाहितेत्यर्थः ॥

३. योगक्षेमम् । योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणम्, तदुभयं वह =प्रापयति । रघुकाराय=कालिदासाय । नमःशब्दार्थश्च सुबर्थवादे म षायामुक्तः—"अपकृष्टत्वज्ञानबोधनानुकूलो व्यापारः स्वरादिपठितनमःशब्दार्थः तत्रापकर्षः प्रयोक्तृपुरुषविशेषनिष्ठो नमस्कार्यावधिक एव प्रतीयते । व्यापार प्रयोक्तृनिष्ठः प्रतीयते शब्दशक्तिस्वाभाव्यात् । अन्योच्चारितेन नमःपदमात्रेण न्यदीयनत्यवबोधनात् । स च व्यापारः करशिरःसंयोगादिरीदृशशब्दप्रयोगश्च इति । प्राभृतकम् । 'भृञ् भरणे' (भ्वा० उ० अ०) 'डुभृञ्' धारणपोषणय (जु० उ० अ०) वेति धातोः 'निष्ठा (पा० ३/२/१०२) इति क्तः । प्राभृत प्राभृतकम् । 'प्राभृतं तु प्रदेशनम्' इत्यमरः । देवताभ्यो मित्रादिभ्यश्च दीयम वस्तु । 'भेंट' 'नज़र' इति भाषायाम् ॥

(४)

या नृत्यति स्म शश्वद्
रसनाग्रे मे पितुः शुभा वाणी ।
तस्यै कृतस्मितायै
मात्रे मेऽयं नमोवाकः ॥
२१।८।१९७५

(५)

वशगामपि नो खिन्नां
वाणीं कृतवान् कदापि यस्तातः ।
मधुरं ब्रह्मानन्दं
तं कुर्वे मानसे मुग्धः ॥
२१।८।१९७५

प्रियम्वदा

४. रसनाग्रे । 'रसज्ञा रसना जिह्वा' इत्यमरः । रसयति, रस आस्वादने (चु० उ० से०) नन्द्यादित्वाल्ल्युः । यद्वा रसयन्त्यनया, 'ण्यासश्रन्थो युच्' । रसति 'रस शब्दे' (भ्वा० प० से०) 'बहुलमन्यत्रापि' इत्यौणादिको युज् वा । शुभा=संस्कृता । कृतस्मितायै । कृतं स्मितं यया तस्यै । 'स (हासः) मनाक् स्मितम्' इत्यमरः । 'स्मिङ् ईषद्धसने' (भ्वा० आ० अ०) भावे क्तः । 'ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितैः । अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत्' । स्मितसम्बन्धादुत्तमा, अत एव माता । नमोवाकः । वचनं वाकः, 'वच् परिभाषणे' इति धातोर्भावे घञ्, कुत्वमादिवृद्धिश्च । नम इत्यस्य वाकः । तत्पुरुषः समासः ॥

५. वशगामपि वाणीं यस्तातः खिन्नां नो कृतवानित्यन्वयः । अथवा वशगामपि वाणीं नो खिन्नां कृतवानिति पाठान्तरमेव कल्प्यताम् । वाणीम्=सरस्वतीम् । पुरा किल ब्रह्मा सरस्वतीं खिन्नां कृतवान् । ब्रह्मानन्दोऽस्मत्पिता तु न तथा कृतवानिति मधुरस्तं मानसे कुर्वे यतो ह्यहं मुग्धः । यद्वा वाणी=

(६)

यत्सम्पर्काद् वाणी
कवितारूपं करोति भङ्गीभिः।
तत्सहृदयाङ्घ्रिधूलिं
सश्रद्धं मस्तके कुर्वे॥
२१।८।१९७५

(७)

ये पूरयन्ति शाब्दे
चषके सततं मदोत्कटां मदिराम्।
वाणी नृत्यति येषां
रङ्गे तेऽस्मत्समाराध्याः॥ [७]
२२।८।१९७५

प्रियम्वदा

काव्यरचना। यथा हि भामिनीविलासे पण्डितराजजगन्नाथस्य "मद्वाणि मा कुरु विषादमनादरेण मात्सर्यमग्नमनसां सहसा खलानाम्' (४/४१) इत्यत्र, उत्तररामचरिते वा भवभूतेः "तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः, शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम्" इत्यत्र वाणीतिशब्दस्य प्रयोगः काव्यरचनापरः॥

६. यत्सम्पर्कात्। येषां सहृदयानां सम्पर्कात्। भङ्गीभिरिति सहार्थे तृतीया। करोति=स्वीकरोतीत्यर्थः॥

७. मदोत्कटां मदिराम्=रमणीयमर्थमित्यर्थः। रङ्गे रङ्गभूमौ तात्स्थ्यात् सभ्यसमूहे। 'रङ्गो रणे खले रागे नृत्ये रङ्गं त्रपुण्यपि' इति विश्वः। पूर्वार्द्धे 'शब्दचषके' इति पाठान्तरम्॥

उदन्या

अहो, विघ्नवत्यः प्रार्थितार्थसिद्धयः । अभिज्ञानशाकुन्तलम्, तृतीयोऽङ्कः ।

(१)

अश्रुकणं त्वां याचे
करुणावरुणालयं च याचे त्वाम् ।
उत्कलिकां त्वां येन
काव्यलता स्यात् सुपल्लविता ॥
१४।४।१९७३

(२)

सौन्दर्यं परितो मां
कृतसौन्दर्यावगाहनश्चाहम् ।
यदि वाञ्छसि तत्पातु-
मुपविश मे चेतसि क्षणकम् ॥
२०।१२।१९७३

प्रियम्वदा

१. अत्र बहून् याचते कविः । एकमश्रुकणमपरं करुणावरुणालयमितरं चोत्कलिकां याचते । काव्यलतापल्लवनेऽश्रुकणादीनां कारणत्वमिति तद्विश्वासः । उत्कलिका । 'उत्कण्ठोत्कलिके समे' इत्यमरः । 'उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि' इति हैमः । 'चिन्ता तु स्मृतिराध्यानं स्मरणं, सस्पृहे पुनः । उत्कण्ठोत्कलिके तस्मिन्नभिध्या तूभयोरपि' इति च शब्दार्णवः ॥

२. पातुम् = अनुभवितुमित्यर्थः ॥

(३)

आगम्यतां मनाङ् मे
हृदयोद्यानस्य लोक्यतां शोभा ।
यत्र भवत्कृतमूला
ललन्ति पीडा-लता ललिताः ॥ [१०]
१०।६।१९७५

काकली

उत्तिबिसेसो कब्बो भासा जा होइ सा होदु । कर्पूरमञ्जरी १/७

(१)

स्मितरेखाकलिता वा
मुक्तालतितापिवाश्रुलुलिता वा ।
कविता मे दयिता मे
व्यस्ताऽव्यस्तापि रुचिरैव ॥
६।१।१९७३

(२)

हरतु समस्तां पीडां
वितरतु वाचां मनोरमां शय्याम् ।
चुम्बत्वेकान्ते त्वां
मुग्धेयं मामकी कविता ॥
१३।१०।१९७३

प्रियम्वदा

३. अत्र रूपकालङ्कारः । ललन्ति = विलसन्तीत्यर्थः ॥

२. वाचां मनोरमां शय्याम् = मनोहरां पदशय्याम् ॥

(३)

करुणाऽऽद्या मे माता
विरहो जनकः सहोदरः शोकः ।
उत्कलिका च वयस्या
कविताऽहं चञ्चला बाला ॥[३]

१७।१०।१९७३

(४)

चुम्बति कस्यचिदधरं
प्रविशत्यङ्के परामृशति चेतः ।
कुरुते कटाक्षपातं
धृष्टा तरूणीत्वरी कविता ॥

८।४।१९७४

(५)

कविता शाव्दी मूर्तिः
पूज्यत एव प्रतिष्ठिता यदि सा ।
कुरु यत्नं तद्वपुषि
रूपे ललिते च निर्माणे ॥

८।४।१९७४

प्रियम्वदा

३. अयं हि कविताया आत्मपरिचयः । मे=मम, कविताया इत्यर्थः ॥

(६)

काश्चन विनोदकणिकाः
केचन खेदा अभावभावाश्च ।
अथ निःश्वासोच्छ्वासाः
सैषा मे काव्यसम्भाषा ॥
२८।४।१९७४

(७)

शब्दास्ते प्राचीना
भावा अपि ते पुरातना जाने ।
मम केवले निवेशे
यत्नस्तेषां न निर्माणे ॥
१।७।१९७५

(८)

रसभारो नास्त्येव
नालङ्कारो विलोक्यतामत्र ।
निष्ठ्यूतं शब्देषु
हार्दं मे नीयतां विज्ञ ॥ [१८]
२२।८।१९७५

प्रियम्वदा

६. अभावभावाश्च = अभावानामस्तित्वम् । सम्भाषा = परिभाषेत्यर्थः; स्वरूपमिति यावत् ॥

७. 'पुरातना इति जाने' इत्यर्थः । 'भावाः' इत्यत्र 'अर्थाः' इत्यपि पाठो भवितुमर्हति । तेषां = शब्दानां भावानां (अर्थानां) च ॥

८. निष्ठ्यूतम् = च्यावितमित्यर्थः । हार्दम् । 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः । हृदयस्य कर्म युवादित्वात् 'हायनान्तयुवादिभ्योऽण्' (पा० ५/१/१३०) इत्यण्, 'हृदयस्य हृल्लेखयदण्लासेषु' (पा० ६/३/५०) इति हृदादेशः ॥

चषकः

सग्धिश्च मे सपीतिश्च मे । यजुर्वेदः, १८।९

(१)

मा क्रीडैतैश्चषकै-
र्नात्र मदो नैव मादनी मदिरा ।
सुप्ता पानकगोष्ठी
क्षीबा याताश्चिरं याताः ॥

९।९।१९७५

(२)

नहि ता गोष्ठ्यः सरसाः
नो ते भावा न ताः शुभा भङ्ग्यः ।
नहि सा मधुपरिपाटी
गच्छ सखे चित्त गच्छेतः ॥

१०।१२।१९७३

(३)

रिक्ताः सर्वे चषका
रिक्ता गोष्ठ्यो मनांसि रिक्तानि ।
क्व नु भावा पदमीयु-
र्वाक्पीठे केवले काव्ये ॥

२७।१०।१९७४

प्रियम्वदा

१. कस्यचिन्निर्वेदोऽपि व्यज्यतेऽत्र । अत्र तथाविधश्चषको निर्विण्णजीवनतः प्रति = प्रतिनिधिरित्यर्थः । प्रतिनिधिर्हिमुखसदृशो भवति ॥

३. अत्रार्यायां पूर्वार्द्धे 'यदा' इति, उत्तरार्द्धे 'तदा' इति च पदं योजनीयम् । वाक् पीठं यस्य तत् तस्मिन् वाक्पीठे । शब्दमेव काव्यत्वेन स्वीकुर्वतां मतानुसारिणी पंक्तिरन्तिमा । तत्र चारुचिः प्रदर्शिता 'केवले' इत्यनेन ॥

(४)

प्रथमे यदि मधुवारे
रिक्ताश्चषकाः समे च भृङ्गाराः ।
अनुतर्षणमथ केन
क्रियतामयि पानसमवेताः ॥
२९।१०।१९७४

(५)

अवदंशोऽपि समग्रः
शुण्डा सरसा क्रमोऽप्यतति मधुनः ।
ललति परिस्रुत् तरला
हन्त विदीर्णः कथं चषकः ॥
३।१।१९७५

(६)

यस्यां मधुशालायां
सर्वे चषका भवन्ति सच्छिद्राः ।
अधरोऽतृप्तस्तस्यां
चेतः खिन्नं मृतो रागः ॥
३।१।१९७५

प्रियम्वदा

४. 'सरकोऽप्यनुतर्षणम्' इत्यमरः । अनुतर्षणम् = मद्यपानम् । 'ञितृषा पिपासायाम्' (दि० प० से०) इति धातोः करणे भावे च ल्युट् ॥

५. अवदंशः = पानरुचिजनकभोज्यम् । 'अवदंशस्तु भक्षणम्' इत्यमरः । 'दंश दशने' (भ्वा० प० अ०) 'अकर्तरि च कारके संज्ञायाम्' (पा० ३/३/१९) इति कर्मणि घञ् । शुण्डा = मधुशाला, 'शुण्डा पानं मदस्थानम्' इत्यमरः, 'शुण्डा पानगृहे मता' इति मेदिनी, 'शुण्डापि जलहस्तिन्यां मदिराकरिहस्तयोः' इति च विश्वः । मधुनः क्रमोऽप्यतति = मधुवारोऽपि सातत्येन चलतीत्यर्थः । परिस्रुत् = सुरा 'सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा' इत्यमरः । परितः स्रवति, 'स्रु स्रवणे' (भ्वा० प० से०), क्विपि, तुकि रूपम् । विदीर्णः = त्रुटित इत्यर्थः । 'विशीर्णः' इति पाठान्तरम् ॥

(७)

ये रिक्तास्ते लुलिता
ये भरितास्ते ललन्ति शुण्डायाम् ।
तत् सखि पूरय चषकं
मज्जतु यस्मिन्निदं चेतः ॥
३।१।१९७५

(८)

चषकोऽयं मदिरेयं
चल भर तर्पय मनोज्ञभङ्गीभिः ।
वितर वितर मा विघ्नं
कुरु, कुरु सरले न सङ्कोचम् ॥
१२।८।१९७५

(९)

हस्ते चषकश्चषके
मदिरा तस्यां च वीक्षितं मदिरम् ।
रचयसि भाग्यमहो मे
रसिके मदिरास्रजः सर्वाः ॥
७।९।१९७५

प्रियम्वदा

७. लुलिताः=कृताऽधोमुखा इत्यर्थः । 'रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय' इति पूर्वमेघे कालिदासः । भर इतच् । 'तदस्य सञ्जातं तारकादिभ्य इतच्' (पा० ५/२/३६) इति । तारकादिराकृतिगणः, भरिताः=पूर्णाइत्यर्थः । सुहृदस्तु तृतीयं पादं 'दयिते पूरय चषकम्' इत्येवं पठन्ति ॥

९. हस्ते तवेति शेषः । वीक्षितम्=दृष्टिः । मदिरम्, माद्यत्यनेन । 'मदी हर्षे' (दि० प० से०) 'इषिमदिमुदि'—इत्याद्यौणादिकेन किरच् । मदिरास्रजः=मदिरापरम्पराः ॥

(१०)

तुभ्यं शपे न याव-
दाचामयसि त्वमद्य मे मदिराम् ।
नो तावद्गन्तास्मि
त्वद्गेहात् पश्यताल्लोकः ॥ [२८]
७।६।१६७५

प्रतिसीरा

हंजे, पेक्ख जागरन्तीए मए सिविणो दिट्टो एव्वं । चारुदत्तम्, चतुर्थोऽङ्कः ।

(१)

निर्विण्णं मानसकं
परिहासाश्चापि नाद्य रोचन्ते ।
रिक्ता जाता गोष्ठी
क्रय्याभावे यथा विपणिः ॥
२०।१२।१६७३

प्रियम्वदा

१०. आचामयसि = पाययसि ॥

१. रिक्ता = निस्सारेत्यर्थः । क्रय्याभावे, क्रय्यस्य वस्तुनोऽभावे । 'क्र
प्रसारितं क्रय्यम्' इत्यमरः । 'डुक्रीञ् द्रव्यविनिमये' इति धातोः 'अचोयत्' (पा
३/१/६७) इति यत् । 'सार्वधातुकार्द्धधातुकयोः' (पा० ७/३/८४) इति गुणः',
'क्रय्यस्तदर्थे' (पा० ६/१/८२) इति सूत्रे "क्रीणातेर्धातोस्तदर्थे क्रयार्थं यत्तस्मिन्न —
भिधेये यति प्रत्यये परतोऽयादेशो निपात्यते" इति काशिका । 'क्रेतारः क्रीणीयुरि
बुध्याऽऽपणे प्रसारितं क्रय्यम्' इति च सिद्धान्तकौमुदी । 'सौदा' इति भाषायाम्
'विपणिः पण्यवीथिका' इत्यमरः ॥

(१२)

(२)

निर्वापिताः प्रदीपाः
विरसा नद्यस्तटाश्च निपतन्तः ।
हन्त कथामतिगूढां
ब्रुवते चित्तस्य विवशस्य ॥
२७।१०।१९७४

(३)

हृतवत् क्वचिदपि किञ्चिद्
हृतमथ केनापि कर्हिचित् सकलम् ।
एतद्वराकचेतो
व्यवहारं केन लेखयतु ॥
७।१।१९७५

(४)

छिन्नं कदापि दग्धं
शुष्कं क्लिन्नं च भूरिशश्चित्तम् ।
शेते साम्प्रतमेतन्
मा स्पृश रोदिष्यति प्रभरम् ॥ [३२]
७।१।१९७५

प्रियम्वदा

३. व्यवहारम् = अभियोगम् । 'केन' इति सहार्थे तृतीया ॥
४. प्रभरम् = अत्यधिकम् ।

उत्कलिका

तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम् । सुभाषितम्

(१)

यस्मिँल् लावण्यलता
यस्मिन् माधुर्यमञ्जुकुसुमानि ।
यस्मिन् विलाससरसी
तं भूधरमेतुमिच्छामः ॥
६।५।१९७३

(२)

परितो झंझावाता
उत्का भूमिर्नवाङ्कुरोत्फुल्ला ।
क्व नु विकिरति निजबिन्दू-
नुदितः सौन्दर्यमेघोऽयम् ॥
१६।७।१९७४

(३)

नूतनपल्लवरागं
पाटलगन्धं वसन्तलावण्यम् ।
आसवसक्तं कृत्वा
रचिता सौन्दर्यसीमाऽसौ ॥
७।६।१९७५

(४)

ते कथयन्ति यदस्या
अलकाधरनयनजघनवक्षोजैः ।
षोडशशरद्भिराप्तो
गतदिवसे परिचयः सकलैः ॥
१०।१०।१९७५

(५)

रूप-सुवर्णैषणिका
तदङ्गयष्टिर्विलोकिताऽस्माभिः ।
यत्र सुबद्धा दृष्टि-
र्नान्यासक्ता भवत्यद्धा ॥ [३७]
१२।१०।१९७५

भणितम्

भो, सुण्णं खु इदं पमदवणं, पुच्छिदव्वं किंचि अत्थि । स्वप्न०, चतुर्थोऽङ्कः ।

(१)

सौवर्णं प्रातर्मे
माध्वी सन्ध्या च राजती रजनी ।
यदि सा भुजङ्गता मे
नोचेत्सर्वोऽपि निस्सारः ॥
५।६।१९७५

प्रियम्वदा

५. रूपमेव सुवर्णम् । तस्यैषणिका = रूपसुवर्णतुला । इषगतावित्येतस्माद्धातोः करणे ल्युट् । कन् । 'नाराची स्यादेषणिका' इत्यमरः । तदेव सौन्दर्यं यत्र सुबद्धा दृष्टिरन्यासक्ता न भवतीतिभावः ॥

(२)

मेघाः कृतप्रयाणाः
ज्योत्स्ना क्षीणा मदोऽपि मन्दः स्यात् ।
व्यस्तान् यदि निजकेशान्
संहर्तुं व्यवसिता सा स्यात् ॥
१२।९।१९७३

(३)

तद् हास्यं तां पीडां
तां वार्तां तां मनोज्ञपरिपाटीम् ।
भावं तद्विवशत्वं
जानात्येका सखी ज्योत्स्ना ॥
१०।१०।१९७३

(४)

सा स्मितवदनी जनता
लुण्ठितपान्थोऽस्मि पत्तने महिते ।
सा प्राभाती वेला
पूर्णोऽहं तद्गतश्चन्द्रः ॥
२०।१२।१९७३

(५)

ध्वंसाक्षरैर्विलिखितं
यैर्यैं मे भाव-भाग्य-निर्माणम् ।
नन्दन्तु स्मृतिभवने
ते ते सानन्दसन्तानाः ॥
२१।१०।१९७४

ललामकम्

शोकः श्लोकत्वमागतः।रामायणम्, बाल० ३/४०

(१)

कारुण्यं गृहमस्या
बाष्पो रमणस्तथा स्मृतिः सुषमा।
नन्दत्वनन्तकालं
पीडा मे प्राप्तसम्बन्धा ॥
१७।१०।१९७३

(२)

पीडाङ्कुरमुद्भूतं
रक्षत रक्षत कवित्वतत्त्वज्ञाः।
यत्संस्पृष्टा वाचः
स्फुरन्त्यसंख्येयसंख्यानैः ॥ [४४]
८।४।१९७४

प्रियम्वदा

१. अस्याः=पीडायाः। 'स्मृतिः सुषमा' इत्यत्र 'सखी सुषमा' इति पाठान्तरम् ॥

२. संख्यानैः=मार्गैः ॥

कोलम्बकः

सोच्छ्वासं मरणम् । चारुदत्तम्, प्रथमोऽङ्कः ।

(१)

नहि ते मधुरा दिवसा
नहि सा रजनी न चापि ता वार्ताः ।
अद्य न कस्यचिदस्मि
भ्रान्तो मेघोऽहमाकाशे ।।

१३।१०।१९७२

(२)

निर्वेदस्तु सतीर्थ्यः
पीडा भार्या सखी च मे करुणा ।
बन्धुः स्फीतो बाष्प-
श्छन्नं च मनोमयं राज्यम् ।।

१५।१०।१९७२

(३)

सोऽस्मि तटो हतभाग्यः
सकृदेवापः समागता यत्र ।
स्मृति-सिकता-शतरेखाः
सन्ति न सरसाः पुनर्धाराः ।।

७।१।१९७५

प्रियम्वदा

२. सतीर्थ्यः=समानोपाध्यायः । 'सतीर्थ्यास्त्वेकगुरवः' इत्यमरः । समाने तीर्थे वसति । 'समानतीर्थे वासी' (पा० ४/४/१०७) इति यत् । 'तीर्थे ये' (पा० ६/३/८७) इति समानस्य सः । छन्नमिति छद्धातोः क्तः । सर्वत्रास्तीति क्रियाऽध्याहारः कर्तव्यः ।।

(४)

वारिणि तुषारखण्डो
यथा गलाम्यनवलोकितः कैश्चित् ।
विगतक्षण इव शनकैः
कदापि गन्तास्मि निःशब्दम् ॥
२६।८।१९७५

(५)

पाटललतेव मन्ये
जीवनवल्ली प्रवर्तते नित्यम् ।
कण्टकलीला यदि वा
कुसुमविकासोऽपि तत्रैव ॥
५।९।१९७५

(६)

स्मृत्वा ममापि मधुरे
कच्चिन्नेत्रे न वारि ते जातम् ।
नो स्मर्यते स कालो
यस्मिंस्त्वं नो स्मृताऽस्माभिः ॥ [५०]
६।९।१९७५

पत्त्राङ्गुलिः

त्वं जीवितं त्वमसि मे हृदयं द्वितीयम् । उत्तररामचरितम्, ३/२६

(१)

अधरे स्मितजह्नुसुतां
करुणायमुनां सरस्वतीं स्निग्धाम् ।
बिभ्राणा कासि शुभे
तीर्थतटी, गीतिका, पीडा ?
१६।७।१९७३

(२)

सौन्दर्यं ते भावान्
दिव्यां ते वा विनोदवैदग्धीम् ।
वाञ्छामि शतं जनुषां
पातुं ते माधुरीधाराः ॥
५।६।१९७३

(३)

हस कुमुदानि हसेयु-
र्जृम्भस्व शुभे लसतुतरां वल्ली ।
आलप मामतिशनकै-
रुच्छ्वसितं गीतकं भूयात् ॥
५।६।१९७३

(४)

मन्दो मन्दः पवनः
रम्या रजनी सुगन्धसञ्चाराः ।
नेत्रैः पेया ज्योत्स्ना
त्वत्स्मरणं मरणमेवाद्य ॥
११।६।१९७३

प्रियम्वदा

४. एवंविधे काले त्वत्स्मरणं नूनमेव मृत्योः कारणं जातम् । चतुर्थे पादे 'तु'इति शेषः । अद्य तु मरणमेवेति रचनान्वयः ॥

(५)

कुड्मलितं ते गात्रं
चेतोऽङ्कुरितं शरारवः केशाः ।
दुर्ललितस्ते लोकः
कुशलः को जीर्यते जीवः ।।
१०।१०।१९७३

(६)

अनुकूला मधुरा त्वं
प्रतिकूला यदि मधुरतरा हन्त ।
क्षणकं चेन्नु तटस्था
मधुरतमा नात्र सन्देहः ।।
१०।१२।१९७३

(७)

हृदयेन समुच्छ्वसितं
रुदितं नेत्रेण कम्पितं वपुषा ।
हसितमहो अधरेण
सखि जाते त्वत्कथासङ्गे ।।
३।८।१९७५

प्रियम्वदा

५. शरारवः=घातुकाः । 'शरारुर्घातुको हिंस्रः' इत्यमरः । 'शॄ हिंसायाम्' (क्र्या० प० से०) इति धातोः 'शॄवन्द्योरारुः' इत्यारुः । लोकः=दृष्टिः । दुर्ललितः । लक्षणया स्वेच्छाचारी ।।

६. मधुरा । मधुरस्तु प्रिये स्वादौ' इति हैमः । मधु माधुर्यमस्यास्तीति 'ऊषसुविमुष्कमधोरः' (पा० ५/२/१०७) इति रः प्रत्ययः । 'मधुरतरा' 'मधुरतमा 'चेत्यत्र तरप्तमपौ प्रत्ययौ ।।

७. 'अहो' इति ओदन्तो निपातः प्रगृह्यः ।।

(८)

शुष्के क्षेत्रे काचि-
दायाता नाम नवपयोधारा ।
इत्यनुभवति मदीयं
चेतस्त्वां वीक्ष्य मदिराक्षि ॥

१७।८।१९७५

(९)

त्वां कृत्वैव विधात्रा
गङ्गा मदिरा सुधा सुगन्धश्च ।
विविधं कृताः समन्तात्
कवयो गीतानि शिल्पानि ॥

६।९।१९७५

(१०)

अङ्कुरितं कण्टकितं
पल्लवितं कुसुमितं फलितमङ्ग ।
सौन्दर्यं तेऽस्माकं
चेतसि गन्धं तनोत्यधुना ॥ [६०]

७।९।१९७५

आवाम्

वागर्थाविव सम्पृक्तौ।रघुवंशम् १/१

(१)

त्वं कविताहं भाव-
स्त्वं वीणाचेदहं ध्वनिर्मधुरे ।
त्वं यात्राहं मार्ग-
स्त्वं धाराहं तटस्तरले ॥

१०।१०।१९७३

(२)

त्वं पीडाहं विरहः
करुणा त्वं शोकसागरश्चाहम् ।
त्वं कवितासि रसोऽहम्
रेखा त्वं चित्रपट्टोऽहम् ॥
१०।१०।१९७३

(३)

त्वं रक्षाहं प्रहरी
त्वं दीक्षा चास्म्यहं नयः शुभदः ।
जटिला त्वमसि परीक्षा
परिणामस्तन्मनोज्ञोऽहम् ॥
१०।१०।१९७३

(४)

कीर्तिस्त्वं ह्लादोऽहम्
सद्भणितिस्त्वं च तत्प्रसादोऽहम् ।
पारी त्वं नागोऽहम्
खेला त्वं खेलखेदोऽहम् ॥
१०।१०।१९७३

प्रियम्वदा

४. पारी = गजपादवन्धनरज्जुः । 'गर्गरीपूरयोः पारी पादरज्वां च हस्तिनः' इति विश्वः । खेला = क्रीडा ॥

(५)

तृप्तिस्त्वं तापोऽहम्
गुप्तिस्त्वं कापि चैव नाशोऽहम् ।
उप्तिस्त्वमूषरोऽहम्
सुप्तिस्त्वं जागरश्चाऽहम् ॥
१०।१०।१९७३

(६)

प्रस्तावनासि रम्या
दिव्योऽहं नाट्यवस्तुविन्यासः ।
त्वं चेत्कार्यावस्था
तद्ग्रथितः सन्धिबन्धोऽहम् ॥
१०।१०।१९७३

(७)

त्वं भूरहमाकाशो
ज्योत्स्ना मा त्वमसि चारुचन्द्रोऽहम् ।
त्वं कमलिनी मनोज्ञा
प्रथमोद्यद्दिनमणिश्चाहम् ॥
१०।१०।१९७३

प्रियम्वदा

५. उप्तिः = वपनं बीजस्येति भावः ॥

६. प्रस्तावना = आमुखम् । दशरूपके च तल्लक्षणम्—'सूत्रधारो नटीं ब्रूते मार्षं वाऽथ विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।

(८)

हारोऽहं ग्रीवा त्वं
हावोऽहं मुग्धभावभङ्गी त्वम् ।
भिक्षुरहं भिक्षा त्वं
कल्पोऽहं चैव शिक्षा त्वं ॥
१०।१०।१९७३

(९)

अब्धिरहं गङ्गा त्वं
मुग्धोऽहमथापि रम्यसंज्ञा त्वम् ।
बोधोऽहं मूर्च्छा त्वं
बद्धोऽहं दिव्यमुक्तिस्त्वम् ॥
१०।१०।१९७३

प्रियम्वदा

प्रस्तावना वा' इति । नाट्यस्य वस्तुनः=वृत्तान्तस्य विन्यासः । कार्यावस्था । 'अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः । आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥' इति तत्रैव । सन्धिबन्धः । 'अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ।' इति चापि तत्रैव । "एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः ।" इति धनिकः ॥

८. कल्पः शिक्षा चेत्युभावपि वेदाङ्गभूतौ । तत्र 'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्' । इति ऋग्वेदप्रातिशाख्यस्य वर्गद्वयवृत्तौ विष्णुमित्रः । "कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने ।" इति मेदिनी । 'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते=उपदिश्यते सा शिक्षा' इति ऋग्वेदभाष्यभूमिकायां सायणः ॥

(१०)

मधुरा वागाद्या त्वं
तदृजुरर्थोऽहमस्मि सर्वाद्यः ।
त्वं गीती रागोऽहं
त्वं प्रीतिः संविभागोऽहम् ॥
१०।१०।१९७३

(११)

त्वं राधाहं कृष्ण-
स्त्वं सीता चासि रामचन्द्रोऽहम् ।
त्वं मायाहं विष्णु-
स्त्वं शक्तिः शङ्करश्चाहम् ॥ [७१]
१०।१०।१९७३

कुरबकः

हरति मुनेरपि मानसं वसन्तः।सुभाषितरत्नभाण्डागारम्, पृ० ३४६

(१)

तस्मै कूजनमेतद्
दत्तं, तुभ्यम् च गुञ्जनं सकलम् ।
अन्यत् तत्सर्वस्मै
केवलमर्मरमहं याचे ॥
१७।२।१९७५

---

१. मर्मरः=शुष्कपत्रध्वनिः । 'मर्मरः स्वनिते वस्त्रपर्णानाम्' इत्यमरः शब्दानुकरणमिति स्वामी। 'मृङ् प्राणत्यागे' (तु० आ० अ०) इत्येतस्माद्

(२)

अह्न्युष्णं निशि शीतं
माधवमित्रं न मत्कृते योग्यम् ।
इति तद्बद्धा प्रकृति-
र्हन्तोच्छ्वासान् समुत्सृजति ॥
१७।२।१९७५

(३)

उन्मेषे सर्षप ते
स्वस्त्ययनं त्वां ब्रुवेऽहमेकान्ते ।
हन्त विषाक्ता वाताः
परितस्त्वामद्य वर्तन्ते ॥
१७।२।१९७५

प्रियम्वदा

धातोः 'कृदरादयश्च' इत्युणादिसूत्रेण 'अरन्' मुमागमो गुणश्चेत्यन्ये । मर्म राति वा 'सुपि स्थः' (पा० ३/२/३) इति कः । 'मर्मरो वसनान्तरे शुष्कपत्रध्वनौ' इति हैमः ॥

२. माधवः = वसन्त एव मित्रम्, मित्रं हि नपुंसकलिङ्गम् । नपुंसकश्च जनो दिवसे कामादिविषये सोत्साहोऽपि रात्रौ सहवासे शैथिल्यं भजते । माधवमित्रमप्येवमेवेति तद्बद्धा = माधवमित्रसम्बद्धा । प्रकृतिः = कामिनीव ॥

३. स्वस्त्ययनम् । ईयते प्राप्यतेऽनेनेत्ययनं स्वस्त्ययनं शुभावहमाशीर्वादं ब्रवे । एकान्ते कथमित्यत्र हेतुमाह—हन्तेत्यादिना ॥

(४)

अयि कोकिल परिवर्तो
भवतां जातश्चिरादहो अधुना ।
कुटिलैः कैरप्येषा
क्रुत्ता सहकारवनमाला ॥
१७।२।१९७५

(५)

पल्लवदलमनुरक्तं
फुल्ला कलिका वसन्तपवमानाः ।
विशरारवश्च भावाः
संकेतमिवाद्य कुर्वन्ति ॥
१७।२।१९७५

(६)

श्रावं श्रावं भृङ्गम्
दर्शं दर्शं च पल्लवं सरसम् ।
तावत्प्रसीद सुरभे
यावन्नो मर्मरो दृष्टः ॥
१४।१०।१९७५

प्रियम्वदा

४. परिवर्त्तः=प्रत्यागमनम् । भवतामिति स्थाने केचन 'भवतः' इति पाठं हृद्यं मन्यन्ते कोकिलगतैकवचनानुरोधात् ॥

५. वसन्तपवमानाः=वसन्तानिलाः ॥

६. सुरभे=वसन्त ! 'वसन्ते पुष्पसमयः सुरभिः' इत्यमरः । दृष्टः=श्रुत इत्यर्थः ॥

(७)

नो गीयते स्म भवता
तेनाप्यास्थीयते स्म तूष्णीकम् ।
आयातेऽद्य वसन्ते
कोकिल मुखरः सभृङ्गस्त्वम् ॥
१४।१०।१९७५

(८)

तज्जाड्यमसौ कालः
सापि हिमानी विलुप्यते सर्वा ।
प्राप्तेऽन्वद्य वसन्ते
पल्लव मुदितः प्रकामं स्याः ॥
१४।१०।१९७५

(९)

पल्लविता का वल्ली
लीलां यस्या निभाल्य भृङ्गाली ।
मत्तालीव समन्ताद्
भ्रान्तोद्भ्रान्तेव कान्तारे ॥
१४।१०।१९७५

प्रियम्वदा

८. महद्धिमं हिमानी ।

९. भृङ्गाली = भृङ्गावली, मत्तावली = मत्तानामावली । 'आली सख्यावली अपि' इत्यमरः ।

(१०)

कूजति कोकिलसार्थो
गुञ्जति भृङ्गावली च मधुमत्ता ।
मन्ये पल्लविता स्याद्
वल्ली काऽप्यद्य सम्भ्रान्ता ॥ [८१]
१४।१०।१९७५

कादम्बिनी

वर्षासु जाता नवयौवनश्रीराशावधूः प्रौढपयोधराभूत् सुभाषितरत्न पृ० ३५५

(१)

कृतसागरावगाहो
मेघविहङ्गः समुत्पतन् गगने ।
अहह मनोरमबिन्दून्
विधूय पक्षान् किरत्यवनौ ॥
२७।७।१९७५

(२)

केचन जलप्रदेशाः
केचन मरवः कृताङ्कुरास्त्वल्पाः ।
अयि धाराधर निखिले
वर्षसि भूमण्डले कस्मात् ॥
२७।७।१९७५

प्रियम्वदा

१. कृतः सागरेऽवगाहोऽनेन । मेघविहङ्गः, अत्ररूपकालङ्कारः ।
२. कस्मात्=किमिति ।

(३)

भरिता गर्ताः सिन्धु-
र्भरिता भरितश्च सागरः सर्वः ।
घन मन्मानससाकं
रिक्तस्त्वं साम्प्रतं जातः ॥
१२।८।१९७५

(४)

नृत्यन्त्यः शिखरेषु
मज्जन्त्यः पल्वलेषु सरसीषु ।
क्रीडन्त्यो मार्गेषु
सरित्सु धावन्त्यहो वर्षाः ॥
२२।८।१९७५

(५)

किमिति जले प्रक्षिपसि
निजवसु विमलं कदर्थितं कुर्वन् ।
अयि जलमुक् तृषितासौ
मरुभूराश्वास्यतां भवता ॥ [८६]
५।६।१९७३

प्रियम्वदा

३. भरिता । भरितम् । उभयत्र तारकादित्वादितच् ।

४. शिखरेषु = भवन-शृङ्गेषु । 'शिखरं पुलकाग्रयोः । पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च । गिरिवृक्षाग्रकक्षासु' इति हैमः । पल्वलेषु = क्षुद्रजलाशयेषु 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः । सरसीषु = कृत्रिमपद्माकरेषु । अत्र वर्षाणां नृत्यादिकाः क्रिया धावने परिवर्तन्ते क्रमशः ।

५. निजवसु = स्वकीयं धनम्, जलमित्यर्थः । तृषिता = पिपासाकुलिता ।

बन्धूकः

अपि सोऽयं त्विषामीशः कन्याराशिमुपागतः सुभाषितरत्नभाण्डागारम्; पृ० ३५९

(१)

भिन्ना तामसशुक्ति-
ज्यौत्स्नी मुक्ता समुद्गता रम्या ।
नृत्यति मनोमरालः
प्रीतः सन्नद्य सर्वत्र ॥

(२)

यौवनमाप्ता ज्योत्स्ना
भ्रमयति रसिकानहो विटाँश्चतुरान् ।
आलिङ्गन्ती सर्वान्
कञ्चुलिकां तामसीं क्षिप्त्वा ॥

(३)

ज्योत्स्ना व्याप्तदिगन्ता
दिव्या हंसी यथा समुड्डीना ।
ज्योतिर्गण्डलिकेव
पूर्णं यद्रौंदसीरन्ध्रम् ॥

प्रियम्वदा

२. विटान्=धूर्तान् । कञ्चुलिकाम्=कञ्चुकीमिति यावत् । तामसीम्=तमोमयीम् ।

(४)

प्रतिपत्रोर्ध्वे पटले
ज्योत्स्ना राधेव राजते रुचिरा ।
अवगुण्ठितोऽन्धकारो
विपरीतरतौ यथा कृष्णः ॥
११।१०।१९७३

(५)

स्फुरितं पर्णे पर्णे
प्रकाशराशिं विलोक्य ये हृष्टाः ।
तल्लीना पीडेव
हृष्टा किं तैस्तमोलीला ॥
११।१०।१९७३

(६)

मैरेयं वितरन्ती
कुर्वाणा वाऽपि चार्तवीं संज्ञाम् ।
निःश्वासैस्तृप्यन्ती
पार्श्वे मे कैतवी रजनी ॥
११।१०।१९७३

प्रियम्वदा

४. प्रत्येकं पत्रस्योर्ध्वे भागे ॥ [इतः पूर्वमप्यार्यात्रिकस्य रचनाकालः ११।१०।१९७३ इत्यस्ति । प्रमादात्तत्र मूले नष्टः ।]

५. तल्लीना=प्रकाशराशिलीना । सन्त्येवंविधा अपि धीरा ये स्वकीयामुत्कटामपि हृद्वेदनां प्रसन्नताप्रकाशैस्तिरोहितां कुर्वन्ति । न चेतरे तदाकलने क्षमा भवन्ति ॥

६. मैरेयम्=मद्यविशेषम् । मिरायां देशविशेष ओषधिविशेषे वा भवम् । 'नद्यादिभ्यो ढक्' (पा० ४।२।९७) । 'शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।

(७)

उत्पतिता शिखरेभ्यः
प्राप्ता तत्रैव सम्भ्रमं सहसा ।
कान्तिकणान् विकिरन्ती
ज्योत्स्ना-पारावती-पङ्क्तिः ॥

११।१०।१९७३

(८)

ज्योत्स्नासुरासुपूरः
किन्नु विशीर्णोऽद्य चन्द्रचषकोऽयम् ।
आचामति संसारो
येनेमां   बद्धसङ्घातः ॥

११।१०।१९७३

(९)

छायाऽधोऽधो वृक्षान्
ज्योत्स्नाकलिते विराजते देशे ।
पतिता यथा महिष्यः
कृतफेनाः पल्वले पयसाम् ॥

११।१०।१९७३

प्रियम्वदा

मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम् ॥' इति माधवः । आर्तवीम्=ऋतुसम्बद्धाम् । कैतवी=वञ्चनापरा ॥

९. वृक्षानित्यत्र "उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥" इति द्वितीया । पयसाम्=दुग्धानाम् ॥

(१०)

क्वचिदयि मनोज्ञतटिनी
वारां वाहो मनोरमो रावः ।
स्मृतिसुन्दरी हसन्ती
दृष्टा स्विन्ना त्वया ज्योत्स्ने ॥
११।१०।१९७३

(११)

धवल-किरण-गुणनद्धैः
क्रीडनकै र्मेघतूलकृततनुभिः ।
क्रीडति शशाङ्कबालः
कृतकलहासोऽम्बरे भवने ॥
११।१०।१९७३

(१२)

आमिक्षायितमेतैः
कुन्दायितमथो सुधायितं जाने ।
ज्योत्स्नाकृतावगाहै-
र्मेघैः स्वायत्तनेपथ्यैः ॥
२१।८।१९७५

प्रियम्वदा

१०. वाराम्=जलानाम् । वाहः=प्रवाहः । रावः=मधुरध्वनिरित्यर्थः ॥

११. अत्र रूपकालङ्कारः । क्रीडनकैः=कीडासाधनैः । 'खिलौना' इति भाषायाम् । क्रीड्यतेऽनेनेति क्रीडनं करणे ल्युट्, ततः स्वार्थे कन् ॥

१२. आमिक्षेवाचरितम्=आमिक्षायितम् । 'आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।' इत्यमरः । क्षीरे दधियोगतो या विकृतिः साऽऽमिक्षा । 'छेना'

(१३)

आमिक्षायितमेतै-
र्मेघैः कुन्दैः सुधायितं सकलैः ।
तूलायितं च काशै-
र्हंसैः काशायितं मन्ये ॥ [६६]

२१।८।१९७५

वाशितम्

आविष्कृतोऽरुणपुरस्सर एकतोऽर्कः । अभिज्ञानशाकुन्तलम् ४/१

(१)

येयं कुमुद्वती सा
प्रातर्म्लाना विलोक्यते दीना ।
तिलतण्डुलचिन्तायां
विभवविहीना यथा गृहिणी ॥

२९।८।१९७५

प्रियम्वदा

(फटा हुआ दूध) इति भाषायाम् । कुन्दमिवाचरितम्=कुन्दायितम् । सुधेवाचरितम्=सुधायितम् । स्वायत्तनेपथ्यैः=स्वायत्तं नेपथ्यम्=आकल्पो येषां तैः ॥

१३. कुन्दैः । 'माघ्यं कुन्दम्' इत्यमरः । 'माघ्यः कुन्दः कुरुण्टकः' इति पुंस्काण्डे रत्नकोषाद् पुंस्त्वमपि । 'कुन्दो माघ्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना' इति मेदिनी । तूलायितम्=तूल इवाचरितम् । 'पिचुस्तूल' इत्यमरः । काशायितम्=काश इवाचरितम् ॥

(२)

राज्यविपणिराक्रान्ता
खाद्यग्रहणातुरैर्यथा पुरुषैः ।
एवं द्रुमप्रशाखा
विहगैः सरवा विलोक्यन्ते ॥
२९।८।१९७५

(३)

कमलोदरभवनान्ताद्
भ्रमराश्चलिता इतस्ततस्त्वरिताः ।
कार्यालयान् स्वकीयान्
निष्ठावन्तो यथा भृत्याः ॥
२९।८।१९७५

(४)

पूर्वस्यां दिशि विरला-
स्ताराः काश्चन विलोकिता दीनाः ।
संसदि बहुमतपक्षे
यथा भवन्त्यल्पसंख्याकाः ॥
२९।८।१९७५

प्रियम्वदा

२. राज्यविपणिः । 'सरकारी दूकान' इति भाषायाम् । सरवाः = सशब्दाः ॥

३. त्वरिताः = तरस्विन । 'तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ।' इत्यमरः । 'त्वरितं वेगतद्वतोः' इति हैमः । 'ञित्वरा संभ्रमे' इति धातोः 'ञीतः क्तः' (पा० ३।२।१८७) इति क्तः । त्वरा सञ्जाताऽस्येति वेतच् ॥

(५)

दीनो वराकचन्द्रः
सम्प्रति यातस्तु पश्चिमामाशाम् ।
मासान्तिमसप्ताहे
स्वल्पायजनो यथा विपणिम् ॥
२६।८।१९७५

(६)

उत्पतितानि वयांसि
व्योम्न्युद्यत्किरणरागरक्तानि ।
निर्वाचनप्रचारे
यथा समुद्घोषपत्राणि ॥
२६।८।१९७५

(७)

सुरतोपभोगखिन्नां
शय्यां लुलितां जहात्यहो बाला ।
रजनिविकासितवल्लीं
मन्दं मन्दं यथा भ्रमरी ॥
२६।८।१९७५

प्रियम्वदा

५. पश्चिमाम्=प्रतीचीम् । अन्तिमां च । 'अग्रपश्चाड्डिमच्' (वा० ४।३।२३) ॥

६. वयांसि=पक्षिणः । समुद्घोषपत्राणि=घोषणापत्राणि ॥

७. प्रभात इति शेषः ॥

(८)

मन्ये प्रकृतिसुगृहिणी
तमांसि बद्ध्वा प्रकाशवस्त्रेषु ।
क्षेप्तुं पूर्वाशातः
पश्चिमकाष्ठां द्रुतं याता ।। [१०७]
१।६।१९७५

मर्मरः

मित्र क्षणं श्रूयताम् । नीतिशतकम् । ५१

(१)

नीचैर्गच्छामीति
त्वं गङ्गे मा कदापि वह खेदम् ।
भवनिटिलाध्युषिताऽसि
सागरकृतसाधुवादा हि ।।
११।१२।१९६३

(२)

कज्जल मा कुरु खेदं
श्यामलवर्णं विलोक्य नैजं त्वम् ।
स्थानं ते प्रमदानां
सुरक्षितं नेत्रयुग्मेषु ।।
११।१२।१९६३

प्रियम्वदा

८. 'प्रकृतिसुगृहिणी' इति कर्तृपदम् । 'तमांसि' इति कर्मपदम् । पूर्वाशातः पूर्वदिशातः । पश्चिमकाष्ठाम् = पश्चिमामाशाम् ।।

२. प्रमदानाम् = उन्मदयोषिताम् । प्रमदो हर्षोऽस्त्यस्या इति प्रमदा । 'प्रमदः संमदे मत्ते स्त्रियामुन्मदयोषिति' इति मेदिनी ।।

(३)

कलम श्याममुखं स्वं
वीक्ष्य न तोषं विधेहि वै दूरम् ।
यत्कविकुलमर्यादां
श्यामः शुक्लां त्वमेधयसे ॥

११।१२।१९६३

(४)

कृतवर्षं त्वं मेघ
लघुरपि गुरुरेव सञ्जातः ।
प्राप्तं यच्छुभ्रत्वं
पूर्णं सन्तर्पिता पृथ्वी ॥

११।१२।१९६३

प्रियम्वदा

३. कलते कलयति वा = अक्षरं प्रकाशयति जनयति वा । कल + 'कलिकर्दरिमः' इत्यौणादिकेनामः प्रत्ययः । स्वनामख्यातलिपिसाधनवस्तु । तत्पर्यायः । लेखनी। वर्णतूली । अक्षरतूलिका । इति ॥

४. उपगीतिश्छन्दः । तल्लक्षणं च वृत्तरत्नाकरे यथा—"आर्याद्वितीयकेऽर्धे यद् गदितं लक्षणं तत्स्यात् । यद्युभयोरपि दलयोरुपगीतिं तां मुनिब्रूते ॥" (२।६) इति । 'अन्त्येनोपगीतिः' (पि० सू० ४।७६) इति पिङ्गलाचार्यः ॥

(५)

मानसरोवरमध्ये
जाने कांश्चन बकान् समायातान् ।
नीरक्षीरविवेके
हंस न तेषां परा शक्तिः ॥
११।१२।१९६३

(६)

निशि रोलम्बं धृत्वा
दिवा च सूर्यं विलोक्य हृष्टा त्वम् ।
किं ते कमलिनि वृत्तं
प्रतिदिनमेतादृशं भवति ॥
११।१२।१९६३

प्रियम्वदा

५. नीरक्षीरविवेको हि हंसानां प्रसिद्धः । तथाहि—अभिज्ञानशाकुन्तले कालिदासः "हंसो हि नीरमादत्ते तन्मिश्रा वर्जयत्यपः।" (६।२८) इति । नीतिशतके च भर्तृहरिः—'अम्भोजिनीवनविहारविलासमेव हंसस्य हन्ति नितरां कुपितो विधाता । न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥" इति ॥

६. रोलम्बम् = भ्रमरम् । रौतीति । रु + विच् । रौः कूजन् सन् लम्बति स्थानात् स्थानान्तरं गच्छतीति । लम्ब् + अच् । वृत्तम् = चरित्रम् । 'वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ।' इत्यमरः । प्रतिदिनम् = अहर्निशमित्यर्थः ॥

(७)

वेश्यानां समुदाये
कुलजे यदि ते न दृश्यते मानम् ।
का चिन्ता सच्छील-
माप्तममूल्यं त्वया रत्नम् ॥
११।१२।१९६३

(८)

व्योम्नि समुड्डीनस्त्वं
खग परिवृत्तस्तृणप्रचुरनीडे ।
कविरिव नग्नयथार्थे
रमणीयात्कल्पनालोकात् ॥
८।१।१९७४

(९)

भज मार्दङ्गिक मौनं
नो ते सन्त्यत्र तत्त्वमर्मज्ञाः ।
इतिकृत्यं तु कलायाः
प्राप्तं तैः पाणिवादा ये ॥
२१।१०।१९७४

प्रियम्वदा

७. मानम्=प्रमाणम् ॥

८. नग्नयथार्थे=केवले सत्यवस्तुनि । नग्ने च यथार्थे नैव काचिदप्यवलोक्यते रमणीयता ॥

९. मार्दङ्गिक । मृदङ्गो लक्षणया तद्वादनं शिल्पमस्य मार्दङ्गिकस्तत्सम्बुद्धौ । 'शिल्पम्' (पा० ४।४।५५) इति ठक् । 'मार्दङ्गिका मौरजिकाः' इत्यमरः । पाणिवादाः=पाणिघाः । वदेः ण्यन्तादण् । पाणिं वादयन्तीति ये ते ॥

(१०)

अयि गायन्ति यशस्ते
प्रतिदिशमेते विहङ्गमाः सरसम् ।
स्वस्ति प्रभञ्जनाय
येन कुलायाः कृताः कीर्णाः ॥
२९।७।१९७५

(११)

नो केवलं कुलायो
ध्वस्तः शाखाऽपि हन्त विक्षिप्ता ।
विरम प्रभञ्जनाद्य
खगोऽयमेकान्ततो दीनः ॥ [११८]
२१।८।१९७५

प्रमीला

एकं त्रीणि च सप्त पञ्च षडिति प्रध्वस्तसंख्याक्रमा वाचः । दशरूपकम् ।३

(१)

तटिनीतटसम्भूतं
तृणमपि धन्यं प्रशंसनीयञ्च ।
आधारो यज्जातं
निमज्जतां भीतमनुजानाम् ॥
११।१२।१९६३

प्रियम्वदा

१०. उत्तरार्द्धे यशोवपुरुद्धाटितः । एतच्च सोल्लुण्ठवचनम् ॥

११. प्रभञ्जनः=प्रबलो वायुः । प्रकृष्टं भनक्ति । 'भञ्जो आमर्दने' इति धातोरौणादिको युच्प्रत्ययः । सम्बुद्धौ प्रभञ्जन ॥

(२)

प्रतिपच्चन्द्रो वन्द्यः
पुंसामुत्साहविहितनिजयत्नः ।
यस्य क्षयः कलानां
देवेभ्यो मुहुर्मुहुर्भवति ॥
११।१२।१९६३

(३)

कविता कीलितभावा
भावावेशास्तथैव धीराणाम् ।
विकलाकुलाश्च वाचो
भाग्ये भूता अभव्यानाम् ॥
१४।४।१९७३

(४)

सविषाः सभोगकुटिलाः
अथो अकर्णाश्च कञ्चुकाकलिताः ।
सर्पेतः सर्पेतः
सर्पा देशेऽत्र सर्पन्ति ॥
१।६।१९७३

(५)

रत्नं सदैव रत्नं
पाषाणोऽप्यस्ति हन्त पाषाणः ।
यदि पाषाणी प्रतिमा
रत्नैः पूज्या न पाषाणैः ॥
१३।१०।१९७३

(६)

केचन तरङ्गरङ्गं
बुद्बुदमन्ये जलानि वै चान्ये ।
विरलास्तद्गाम्भीर्यं
पश्यन्त्यम्भोनिधिं याताः ॥
८।४.१९७४

(७)

हंहो कृतस्तमोभिः
सन्धिर्यदि नाम दीपकैर्दीप्तैः ।
हन्त निमील्याक्षीणि
विलोक्यतां कोऽपि परिणामः ॥
१७।८।१९७५

(८)

धन्याऽसौ रसगोष्ठी
यत्र न वीणारवो न वा मदिरा ।
मौनं यत्र सुवाचां
यत्र निवेशो न हृदयानाम् ॥
१७।८।१९७५

प्रियम्वदा

७. यदि नाम दीप्तैर्दीपकैः कर्तृभिः तमोभिः सह सन्धिः कृत इति सरलः ॥

८. धन्या लक्षणयाऽधन्या । रसगोष्ठी=नीरसगोष्ठीतिलक्षणया । निवेशः=संस्थितिः ॥

(९)

यत्प्रहरिणः प्रसुप्ताः
किं कुर्यात् तद् वराकमुद्यानम् ।
एको लुनातु पल्लव-
मेकः कुसुमं फलं चैकः ॥
१७।८।१९७५

(१०)

किं क्रियतां हा मात-
र्बद्धाऽऽशा यत्र तत्र सा त्रुटिता ।
हंसाः क्षीरं त्यक्त्वा
यदैव दृष्टा जले क्षारे ॥
२१।८।१९७५

(११)

कुसुमात् कुसुमं मधुलिड्
गुञ्जन्नभ्येति कोषगन्धाढ्यम् ।
तद्वत् कविरप्येति-
शब्दं युक्तार्थसङ्घातम् ॥ [१२९]
२२।८।१९७५

प्रियम्वदा

९. प्रहरिणः=रक्षकाः । वराकम्=अरक्षितम् । उत्तरार्द्धे 'एको लुनातु पल्लवमितरः कुसुमं फलञ्चान्यः' इति पाठान्तरम् ॥

१०. यत्राशा बद्धा तत्र सा त्रुटितेत्यन्वयः । हंसा इति केचन विश्वासास्पदभूताः । क्षीरमिति प्रतिज्ञातं सिद्धान्तादिकम् । जले क्षार इति तुच्छविषये ॥

अनुबोधः

न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः । काव्यप्रकाशः ।७

(१)

स्निग्धच्छाया वृक्षा
भ्रान्ता मेघाश्च मादनः पवनः ।
उच्चावचा च भूमि-
र्मत्तं चेतोऽद्य किन्नु स्यात् ॥
८।९।१९७३

(२)

गोमयसंस्कृतभूमा-
वङ्गुलिरेखा यथा भवन्त्युल्काः ।
उन्निद्रा स्मृतिरेखा-
स्तथा भवन्त्यद्य रमणीयाः ॥
१७।८।१९७५

गोप्रवेशः

अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः । ध्वन्यालोकः ।१

(१)

तिमिरप्रसेवकेऽसौ
सन्ध्या चित्त्वा प्रकाशवासांसि ।
तारागर्भकसुषमा
मन्ये लोके समायाता ॥
६।९।१९७५

प्रियम्वदा

१. भूमिः=भावभूमिरपि ॥

१. तिमिरप्रसेवके=अन्धकाररूप-वेष्टन-विशेषे । (प्रसेवकः='थैला' इति भाषायाम्) तारा एव गर्भक इति तारागर्भकः, तारागर्भकः सुषमा यस्याः सा

(२)

तन्वीं प्रकाशशाखा-
मध्याक्रान्तोऽन्धकारगृध्रोऽसौ ।
धुन्वन् कृष्णान् पक्षान्
तिमिरे लोकान् निपातयति ॥ [१३३]
६।६।१९७५

अवतमसम्

महामोहे निधीयामहे । काव्यप्रकाशः ।१०

(१)

यातः प्रातःकालः
सन्ध्या यातास्तथा मधुरयामाः ।
जीवनमेव यातं
भ्रात र्नो किञ्चिदायातम् ॥
२।७।१९७३

(२)

आसन् केचन वृद्धाः
प्राप्तं ज्योतिस्तमांसि यैश्छित्वा ।
किन्तु प्रकाशभीत-
स्तमांसि याचे सुशान्तानि ॥ [१३५]
१३।१०।१९७५

प्रियम्वदा

तारागर्भकसुषमा । गर्भकः=-केशमध्ये विन्यस्ता माला । 'केशमध्ये तु गर्भकः' इत्यमरः ॥

२. वृद्धाः=ऋषयः, ज्योतिः=प्रकाशात्मकं ज्ञानम् । तमांसि=अन्धकारात्मकमज्ञानम् । प्रकाशभीतः । प्रकाशोऽत्र साम्प्रतिकं भौतिकं चाकचिक्यम् । तदितरा स्थितिरुत्तरार्धे याचिता ॥

इत्युमाकान्तशुक्लविरचितायां मञ्जल्यायां तत्कृता 'प्रियम्वदा' नाम
टिप्पणी समाप्ता ॥
॥ शुभमस्तु सर्वेषाम् ॥

मङ्गल्यास्थमुक्तकसूची (अकारादिक्रमेण)

मुक्तकानि	पृष्ठाङ्काः
१. अङ्कुरितम्	२२
२. अधरे	१९
३. अनुकूला	२१
४. अब्धिः	२५
५–६. अयि	२८,४३
७. अवदंशः	१०
८. अश्रुकणम्	५
९. अह्नि	२७
१०. आगम्यताम्	६
११–१२. आमिक्षा०	३५,३६
१३. आसन्	४८
१४. उत्पतिता	३४
१५. उत्पतितानि	३८
१६. उन्मेषे	२७
१७. कज्जल	३९
१८. कमल०	३७
१९. करुणा	७
२०. कलम	४०
२१–२२. कविता	७,४४
२३. कारुण्यम्	१७
२४. काश्चन	८
२५. किम्	४६
२६. किमिति	३१
२७. कीर्तिः	२३
२८. कुड्मलितम्	२१
२९. कुसुमात्	४६
३०. कूजति	३०
३१. कृतसागर०	३०
३२. कृतवर्ष	४०
३३–३४. केचन	३०,४५
३५. क्वचित्	३५
३६. गोमय०	४७
३७. चषकः	११
३८. चुम्बति	७
३९. छाया	३४
४०. छिन्नम्	१३
४१–४२. ज्योत्स्ना	२२,३४
४३. तज्जाड्यम्	२९
४४. तटिनी०	४३
४५. तत्	१६
४६. तन्वीम्	४८
४७. तस्मै	२६
४८. तिमिर०	४७
४९. तुभ्यम्	१२
५०. तृप्तिः	२४
५१. ते कथयन्ति	१५
५२. त्वं कविता	२२
५३. त्वं पीडा	२३

मुक्तकानि	पृष्ठाङ्काः	मुक्तकानि	पृष्ठाङ्काः
५४. त्वं भूः	२४	८२. प्रस्तावना	२४
५५. त्वं रक्षा	२३	८३. भज	४२
५६. त्वं राधा	२६	८४. भरिताः	३१
५७. त्वां कृत्वा	२२	८५. भिन्ना	३२
५८. दीनः	३८	८६. मधुरा	२६
५९. धन्या	४५	८७. मन्दः	२०
६०. धवल०	३५	८८. मन्ये	३९
६१. ध्वंसाक्षरैः	१६	८९. मा क्रीड	९
६२–६३. नहि	९,१८	९०. मानसरोवर०	४१
६४. निर्वापिताः	१३	९१. मेघाः	१६
६५. निर्विण्णम्	१२	९२. मैरेयम्	३३
६६. निर्वेदः	१८	९३. यत्कृपया	१
६७. निशि	४१	९४. यत्प्रहृरिणः	४६
६८. नीचैः	३९	९५. यत्सम्पर्कात्	४
६९. नूतन०	१४	९६. यस्मिन्	१४
७०. नृत्यन्त्यः	३१	९७. यस्याम्	१०
७१. नो केवलम्	४३	९८. यातः	४८
७२. नो गीयते	२९	९९. या नृत्यति	३
७३. परितः	१४	१००. ये पूरयन्ति	४
७४. पल्लव०	२८	१०१. ये रिक्ताः	११
७५. पल्लविता	२९	१०२. येयम्	३६
७६. पाटल०	१९	१०३. योगक्षेमम्	२
७७. पीडाङ्कुर०	१७	१०४. यौवनम्	३२
७८. पूर्वस्याम्	३७	१०५. रत्नम्	४४
७९. प्रतिपत्०	४४	१०६. रसभारः	८
८०. प्रतिपत्र०	३३	१०७. राज्यविपणिः	३७
८१. प्रथमे	१०	१०८. रिक्ताः	९

मुक्तकानि	पृष्ठाङ्काः
१०९. रूपसुवर्ण०	१५
११०. वन्दे	२
१११. वशगाम्	३
११२. वारिणि	१९
११३. वेश्यानाम्	४२
११४. व्योम्नि	४२
११५. शब्दाः	८
११६. शुष्के	२२
११७. श्रावम्	२८
११८. सविषाः	४४
११९. सा स्मित०	१६
१२०. सुरत०	३८
१२१. सोऽस्मि	१८
१२२–१२३. सौन्दर्यम्	५,२०
१२४. सौवर्णम्	१५
१२५. स्निग्ध०	४७
१२६. स्फुरितं	३३
१२७. स्मितरेखा	६
१२८. स्मृत्वा	१९
१२९. हरतु	६
१३०. हंहो	४५
१३१. हस	२०
१३२. हस्ते	११
१३३. हारः	२५
१३४. हृतवत्	१३
१३५. हृदयेन	२१

मङ्गल्या

शीर्षकसूची (अकारादिक्रमेण)

शीर्षकम्	पृष्ठाङ्काः
१. अनुबोधः	४७
२. अवतमसम्	४८
३. आवाम्	२२–२६
४. उत्कलिका	१४–१५
५. उदन्या	५–६
६. कल्या	१–४
७. काकली	६–८
८. कादम्बिनी	३०–३१
९. कुरवकः	२६–३०
१०. कोलम्बकः	१८–१९
११. गोप्रवेशः	४७–४८
१२. चपकः	९–१२
१३. पत्राङ्गुलिः	१९–२२
१४. प्रतिसीरा	१२–१३
१५. प्रमीला	४३–४६
१६. बन्धूकः	३२–३६
१७. मणितम्	१५–१६
१८. मर्मरः	३९–४३
१९. ललामकम्	१७
२०. वाशितम्	३६–३९



मङ्गल्या मधुवल्ली जृम्भारम्भं करोतु मधुमधुरम् ।
यद्यधरीकृतचन्द्रः कटाक्षपातो भवेद्भवताम् ॥

× × ×

मधुरमुदारं रङ्गे प्रवर्तमाना नटीव रचनेयम् ।
काव्ये कृतक्षणानामतन्द्रयत्वद्य सद्भावान् ॥

—उमाकान्तशुक्लस्य